नवमं सोपानम्

अ) पशुपक्षिलक्षणं

पराशराख्यो मुनिर्बृहद्रथाय शार्ङ्गरवनाम्ने स्वशिष्याय यद् गोलक्षणं प्राहोक्तवान्, ततस्तस्माद् गोलक्षणान्मया आचार्येण समासः संक्षेपः क्रियते। सर्वाः समस्ता गावः शुभलक्षणाः प्रशस्त-लक्षणाः। अपिग्रहणांदशुभलक्षणाः सर्वा निःशेषास्तथा तेनैव प्रकारेणागमत आगमाद् मुनिप्रणीताच्छा-स्त्रादभिधास्ये कथयिष्ये।।

यश्च घ्राणोद्देशे नासायां सवलिर्वलियुक्तः। मार्जारमुखो बिडालतुल्यवदनः। दक्षिणतो दक्षिण-भागे सितः शुक्लवर्णः। कमलोत्पललाक्षामः कमलं पद्मम, उत्पलं नीलोत्पलम्, लाक्षा प्रसिद्धा लोहितवर्णा। आसां सदृशी आभा कान्तिर्यस्य। सुवालधिः शोभनपुच्छवालः। वाजितु-ल्यजवः, वाजी तुरगः, तत्तुल्य-स्तत्सदृशो जवो वेगो यस्य। शीघ्रगतिरित्यर्थः।

ब) पशुपक्षि चेष्टा -

यत् शाकुनं शक्र इन्द्रः, शुक्रो भार्गवः, वागीशो बृहस्पतिः, कपिष्ठलो मुनिः, गरुत्मान् वैनतेयः। एषां शास्त्रकर्तृणां मतेभ्यः ऋषभाख्य आचार्यः प्रोक्तवान्। तथा भागुरेर्मुनेर्देवलस्य च मुनेर्मताद्यच्छाकुनम्, ऋषभाख्यः प्राह।

भारद्वाजमतमिति। यच्च शाकुनं भारद्वाजाख्यस्य मुनेर्मतं दृष्टावलोक्य श्रीद्रव्यलोके महाराजाधिराजवंशप्रसूत आवन्तिक उज्जयिन्या नृपो राजा प्राहोक्तवान्।

मतं सप्तर्षीणामिति। यच्छाकुनं सप्तर्षीणां मरीच्यादीनां मतम्। यच्चान्यत् संस्कृतं लोके व्यवहारित। यच्च प्राकृतं शाकुनं संस्कृतवाचा रहितम्। यानि च शाकुनानि गर्गाद्यैर्गर्गवसिष्ठ-पराशरकाश्यपैर्ऋषिपुत्रैर्भूरिभिर्बहुभिर्यात्राकारैरुक्तानि कथितानि।

तानि च दष्टवालोक्येमं वराहमिहिरो वराहमिहिराख्यो मगधद्विजः शिष्याणां प्रीत्या हेतुभूतया प्रीत्यैव प्रीत्यर्थं सर्वशाकुनसंग्रह संक्षेपमुत्तमं प्रधानं चकार कृतवान्।।

क) स्त्री-पुरुषलक्षणं

उन्मानं च मानं च गतिश्च संहतिश्च सारश्च वर्णश्च स्नेहश्च स्वरं च प्रकृतिश्च सत्त्वं च तदुन्मानमा-नगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्त्वम्। न केवलमुन्मानमानाद्यं यावदनूकं क्षेत्रं मृजां च। आदौ प्रथमं पुरुषलक्षणं सामुद्रम। तद्वेति जानातीनि सामुद्रवित्, समुद्रे प्रोक्तं पुरुषलक्षणं सामुद्रम। तद्वेति जानातीति सामुद्रवित्, वदति कथयतीति। यातमतिक्रान्त-मिष्टानिष्टफलम्। न केवलं यावदनागतमेष्यद्वेति। अत्र केचिन्मन्यन्ते। प्रकृतिपर्यायं सत्त्वमाचार्येण व्याख्यातम्। एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् इति। तस्मात् सत्त्वशब्दमत्रातिरिच्यते। जातिरिच्यंत इत्युच्यते। सत्त्वं नाम चेतोधर्मः, यस्मिन् सति न कुतश्चिद्भयमुत्पद्यते, न कस्यामप्यवस्थायां विषादः समुपजायते, तत्समाचक्षते कुशलाः।

ड) स्त्री-पुरुष राजचिह्नानि

यस्याः कुमार्याः कन्यकायाः। पादौ चरणौ। स्निग्धोन्नताग्रतनुताम्रनखौ स्निग्धौ सस्नेहावुन्नतावुच्चौ कूर्मपृष्ठौ, अग्रे तनू ययोः। ताम्रनखौ रक्तवर्णौ नखौ ययोः। समोपचित-चारुनिगूढगुल्फौ समौ तुल्यावुपचितौ समांसलौ चारू दर्शनीयौ निगूढावनुल्बणौ गुल्फौ ययोः। तथाश्लिष्टाङ्गुली श्लिष्टा घना अङ्गुल्यः पादशाखा ययोः। कमलकान्तितलौ कमलस्य पद्मस्येव कान्तिस्तले ययोः। तथाभूतौ पादौ यदि भूवो भूम्या अधिपतित्वं राज्यमिच्छेत् तदा तामुद्वहेत्।

मत्स्याङ्कुशाब्जेति। मत्स्यो मीनः। अङ्कुशः प्रसिद्धः। अब्जं पद्मम्, यवो यवाकारः, वज्रमायुधम्। हलं लाङ्गलम्। असिः खड्गः। एतैश्चिह्नैश्चिह्नितौ चरणौ पादौ। तथाऽस्वेदनौ स्वेदरहितौ। मृदुतलौ मृदुनी मृदुनी तले ययोस्तौ तथाभूतौ प्रशस्तौ। तथा च समुद्रः।

१. गोलक्षणाध्यायः

पराशरः प्राह बृहद्रथाय गोलक्षणं यत्क्रियते ततोऽयम्।

मया समासः शुभलक्षणास्ताः सर्वास्तथाप्यागमतोऽभिधास्ये।।१ ।।

पराशराख्यो मुनिर्बृहद्रथाय शार्ङ्गरवनाम्ने स्वशिष्याय यद् गोलक्षणं प्राहोक्तवान्, ततस्तस्माद् गोलक्षणान्मया आचार्येण समासः संक्षेपः क्रियते। सर्वाः समस्ता गावः शुभलक्षणाः प्रशस्तलक्षणाः। अपिग्रहणांदशुभलक्षणाः सर्वा निःशेषास्तथा तेनैव प्रकारेणागमत आगमाद् मुनिप्रणीताच्छास्त्रादभिधास्ये कथयिष्ये।।

तत्रादावेवाशुभलक्षणान्याह

सास्त्राविलरूक्षाक्ष्यो मूषकनयनाश्व न शुभदा गावः।

प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः।।२ ।।

दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः।

ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च।।३ ।।

श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा।

अतिककुदाः कृशदेहा नेष्टा हीनाधिकांग्यश्च।।४ ।।

अक्षिशब्दः, प्रत्येकमभिसम्बध्यते। सास्त्राक्षयः सास्त्रे नित्यमश्रुणा संयुक्ते अक्षिणी यासां ताः सास्त्राक्ष्यः। आविले कलुषै अप्रसन्ने अदिक्षणी यासां ताः। रूक्षे अस्निग्धे अक्षिणी यासां ताः। मूषकनयताः, मूषकसदृशनैत्रास्ता गावो न शुभदा विषाणानि शृङ्गाणि यासां तो अप्यशुभाः। पाश्च करटकाः, करटो वर्णः कृष्णलोहित इत्यर्थः। खरसदृशवर्णाश्च न शुभदाः।

या गावो दशदन्त्यः। सप्तदन्त्यः। चतुर्दन्त्यः। दश सप्त चत्वारो वा दन्ता यासां ताः। प्रलम्बं लम्बमानं मुण्डं शृङ्गरहितमाननं मुखं यासाम्। विनतमस्पष्टं पृष्ठं मध्यं यासाम्। ह्रस्वानुच्चा स्थूला बृहती ग्रीवा शिरोधरा यासाम्। यवमध्या यवसदृशं मध्यं यासाम्। दारितखुराः प्रभग्नाः खुराः पादा यासाम्।

श्यावाः श्याववर्णा अतिदीर्धा अत्यायामिनी जिह्वा रसना यासाम्। गुल्फैरतितनुभिरत्यल्पैरतिबृहद्भिरतिस्थूलैर्वा अरूपैः। खुरोपरि गुल्फप्रदेशः। अतिककुदा बृहत्ककुदयुक्ताः। ककुदो

ग्रीवान्ते पृष्ठभागेऽत्युच्चतरो भागः। कृशदेहा दुर्बलशरीराः। हीनाङ्ग्यः अधिकाङ्ग्यो वा नेष्टा न शुभाः। तथा च पराशरः- **बृ.सं., पृ-१६९**

अथ वृषभलक्षणमाह-

वृषभोऽप्येवं स्थूलातिलम्बवृषणः शिराततक्रोडः।
स्थूलशिराचितगण्डास्त्रिस्थानं मेहते यश्च।।५।।
मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्यैव।
कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः।।६।।

स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च।
गृहजतोऽपि त्याज्यो यूथविनाशावहो वृषभः।।७।।

श्यामकपुष्पचिताङ्गो भस्माऽरुणसन्निभो बिडालाक्षः।
विप्राणामपि न शुभं करोति वृषभः परिगृहीतः।।८।।

यो वृषभो दान्तः श्यामकपुष्पचिताङ्गः श्यामकैः श्यामवर्णैः पुष्पैः कुसुमैश्चितानि संयुक्तान्यङ्गान्यव-यवानि यस्च। श्यामकश्चासौ पुष्पचिताङ्गश्चेति केचित्। श्यामकवर्णैः श्वेतैस्तिलकैः कुसुमाकारैश्चिताङ्गः। भस्मारुणसन्निभो भस्मलोहितमिश्रवर्णः। बिडालाक्षो मार्जारनेत्रः। स तथाभूतो विप्राणां ब्राह्मणानामपि प्रतिग्रहपरिगृहीतो न शुभं करोति, किन्त्वन्येषामिति।।

अन्यदप्याह-

ये चोद्धरन्ति पादान् पङ्कादिव योजिताः कृशग्रीवाः।
कातरनयना हीनाश्च पृष्ठतस्ते न भारसहाः।।९।।

ते न भारसहा भारोद्वहने न समर्था इति। ये च वृषभा योजिता भारादौ नियुक्ताः पङ्कात् कर्दमादिव पादान् खुरानुद्धरन्ति। कृशग्रीवा दुर्बलकन्धराः। तथा च पराशरः-**बृ.सं., पृ-१७१**
अधुना शुभलक्षणमाह-

मृदुसंहतताम्रोष्ठास्तनुस्फिजस्ताम्रतालुजिह्वाश्च।
तनुह्रस्वोच्चश्रवणाः सुकुक्षयः स्पष्टजंघाश्च।।१०।।

आताम्रसंहतखुरा व्यूढोरस्का बृहत्ककुदयुक्ताः।

स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गा ः।।११।।

तनुभूस्पृग्वालघयो ाक्ता विलोचना महोच्छ्रूसाः।

सिंहस्कन्धास्तन्वल्पकम्बलाः पूजिताः सुगताः।।१२।।

वामावर्तैवीम दक्षिणपार्श्वे च दक्षिणावर्तैः।

शुभदा भवन्त्यनडुहो जंघाभिश्वैणकनिभाभिः।।१३।।

ये अनडुहो दान्ता वामे पार्श्वे वामावर्तै रोमभिर्युक्ता दक्षिणपार्श्वे दक्षिणावर्तैश्च ते च शुभदाः प्रशस्ता भवन्ति। तथा एणकनिभाभिरेणसदृशीभिः परिपूर्णमांसाभिर्जङ्घाभिः शुभदा भवन्ति। एणकः प्राणिविशेषः। अविरिति केचित्।।

अन्यदप्याह-

वैदूर्यमल्लिकाबुदुदेक्षणाः स्थूलनेत्रवर्माणः।

पार्ष्णिभिरस्फुटिताभिः शस्ताः सर्वेऽपि भारवहाः।।१४।।

वैदूर्यः प्रसिद्धो मणिविशेषः श्यामवर्णः। मल्लिकेक्षणो मल्लिकाक्षस्तल्लक्षणम्। दृङ्मण्डलबाह्ये मल्लिकाकुसुमसदृश्यो राज्यो यस्य भवन्ति स मल्लिकाक्षः। एतल्लक्षणमश्वस्य पठ्यते। तथा च गाहा-

अनेन लक्षणेन युक्तो मल्लिकाक्षः, तथा बुद्बुदः प्रसिद्ध एव। एवं वैदूर्यमल्लिकाबुद्बुदेक्षणास्त-त्तुल्यनेत्राः। नेत्रपक्ष्माण्यक्षिरोमाणि तानि स्थूलान्यतिघनानि येषाम्। पार्ष्णिभिः खुरपश्चिमभागैः। अस्फुटि-ताभिरभग्नाभिः। ते सर्वे निःशेषाः प्रशस्ता भारसहाश्च। भारं सहन्त इति।।

अन्यदप्याह-

घ्राणोद्देशे सबलिर्मार्जारमुखः सितश्व दक्षिणतः।

कमलोत्पललाक्षाभः सुवालधिर्वाजितुल्यजवः।।१५।।

लम्बैर्वृषणैर्मेषोदरश्च संक्षिप्तवंक्षणाक्रोडः।

ज्ञेयो भाराध्वसहो जवेऽतुल्यश्व शस्तफलः।।१६।।

सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महावक्त्रः।

हंसो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः।।१७।।

भूस्पृग्वालधिराताम्रविषाणो रक्तदृक् ककुभी च।
कल्माषश्च स्वामिनमचिरात् कुरुते पतिं लक्ष्म्याः।।१८।।

यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपि शस्तफलः।
मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तोऽस्ति।।१९।।

यो वा वृषभः सितः शुक्लैश्चरणैः पादैर्युक्तः। यथेष्टवर्णो यादृग्वर्णः शुभाशुभवर्णयुक्तोऽपि स शुभफलकृत्। केचित् "यो वा सितैकचरणः," इति पठन्ति। एकान्तप्रशस्तः सर्वेलक्षणसम्पूर्णो यदि नास्ति न विद्यते, तदा मिश्रफलो व्यामिश्रफलोऽपि ग्राह्यः। अपिशब्दः सम्भावनायाम्। केचित् यदि नैकान्ते प्रशस्तोऽस्ति इति पठन्ति। मिश्रफलस्य शुभानामशुभानां च लक्षणानामन्तरं कृत्वा यद्येकान्तेऽशुभोऽन्तेऽवसाने नास्ति नातिरिच्यते, तदा शुभाशुभलक्षणोऽपि ग्राह्यः। तथा च पराशरः- **बृ.सं., पृ-१७४**

२. श्वलक्षणाध्यायः

पादाः पञ्चनखास्त्रयोऽग्रचरणः षड्भिर्नखैर्दक्षिण-
स्ताम्रौष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन् भुवं याति च।
लाङ्गूलं ससटं दृगृक्षसदृशी कर्णौ च लम्बौ मृदू
यस्य स्यात् स करोति पोष्टुरचिरात्पुष्टां श्रियं श्वा गृहे।।१।।

यस्य शुनस्त्रयः पादाश्चरणाः पञ्चनखाः पञ्चभिर्नखैः कररुहैर्युक्ताः। चतुर्थो दक्षिणाऽग्रचरणो-ऽग्रपादः षड्भिर्नखैर्युक्तः। ताम्रौष्ठाग्रनसः, ताम्रवर्णौ लोहितावोष्ठौ तथा नासिकाग्रं यस्य। मृगेश्वरः सिंहस्तत्सदृशी गतिर्गमनं यस्य स मृगेश्वगतिः। भुवं भूमिं जिघ्रनं याति गच्छति। लाङ्गूं पुच्छं ससटं सटाभिर्युक्तं जटिलमित्यर्थः। दृग्दृष्टिः ऋक्षसदृशी ऋक्षः प्राणी तत्सदृशी तत्तुल्या दृष्टिरित्यर्थः। कर्णौ श्रोत्रे। लम्बौ प्रलम्बो। मुदू मार्दवयुक्तौ। यस्यैवं स्याद् भवेत् स श्वा कुक्कुरः। पोष्टुः पालयितुः। अचिरात् शीघ्रमेव।गृहे वेश्मनि। पृष्टां परिणपूर्णाम्। श्रियं लक्ष्मीं करोति। तथा च गर्गः- **बृ.सं., पृ-१७६**

अथ कुक्कुरीपटीलक्षणमाह-

पादे पादे पञ्च पञ्चाग्रपादे वामे यस्याः षण्नखा मल्लिकाक्ष्याः।
वक्रं पुच्छं पिङ्गलालम्बकर्णा या साराष्ट्रं कुक्कुरी पाति पुष्टा।।२।।

यस्याः कुक्कुर्याः पादे पादे प्रतिचरणे पञ्च पञ्च नखाः कररुहाः। वामेऽग्रपादे चतुर्थचरणे यस्याः षण्नखा भवन्ति। या च मल्लिकाक्षी। दृङ्मण्डलबाह्ये मल्लिकाकुसुमसदृश्यो राज्यो यस्या भवन्ति सा मल्लिकाक्षी। एवंविधाया मल्लिकाक्ष्या यस्याः पुच्छं लाङ्गूलं वक्रं कुटिलं च। पिङ्गला लम्बकर्णा च या सा पुष्टा परिपोषितां राष्ट्रं पाति रक्षति।।

३. कुक्कुटलक्षणाध्यायः

कुक्कुटस्त्वृजुतनूरुहाऽङ्गुलिस्ताम्रवक्त्रनखचूलिकः सितः।

रौति सुस्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम्।।१।।

यः कुक्कुटः कृकवाकुः। ऋजुतनूरुहाङ्गुलिः, ऋजवः स्पष्टास्तनूरुहाः पक्ष्माणि यस्यः, ऋज्वङ्गुविः स्पष्टाः करशाखाः। ताम्रवर्णं वक्त्रं मुखं यस्य। ताम्रनखः , ताम्रचूलिकस्ताम्रचूडः। सितः शुक्लः। उषात्यये रात्र्यवसाने सुस्वरं मधुरं रौति शब्दं करोति। स नृपस्य राज्ञो राष्ट्रस्य च जनपदस्य वाजिनामश्ववानां वृद्धिदो वृद्धिं ददाति। तथा च गर्गः- **बृ.सं., पृ-१७८**

अथान्यल्लक्षणमाह-

यवग्रीवो यो वा बदरसदृशो वापि विहगो

बृहन्मूर्द्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः।

स शस्तः संग्रामे मधुमधुपवर्णश्च जयकृद्

न शस्तो योऽतोऽन्यः कृशतनुरवः खञ्जचरणः।।२।।

यो विहगः पक्षी यवग्रीवो यवसदृशग्रीवः। यवशिरा इति लोके प्रसिद्धः। यो वा बदरसदृशो लोहितवर्णः। सुपक्वबदरफलाथ इत्यर्थः। बृहन्मूर्धा विस्तीर्णशीर्षः। बहुभिर्नानाकारैः सितरक्तनीलपीतकृष्णै-र्वर्णैर्युक्तः। रुचिरो निर्मलः। स कुक्कुटः संग्रामे युद्धे शस्तः प्रशस्तः। अथवा मधुवर्णः पीतवर्णो मधुपवर्णो भ्रमरवर्णः कृष्णः सोऽपि जयकृत। अतोऽस्मादुक्तादन्योऽपरो न शस्तो न शुभः। य : कृशतनुरवः कृशः क्षामस्तनुरल्पो रवः शब्दो यस्य। खञ्जचरणो विकलपादः सोऽपि न शुभः।।

अथ कुक्कुटीलक्षणमाह-

कुक्कुटी च मृदुचारुभाषिणी स्निग्धमूर्तिरुचिराननेक्षणा।

सा ददाति सुचिरं महीक्षितां श्रीयशोविजयवर्यिसम्पदः।।३।।

या च कुक्कुटी मृदु मार्दवयुक्तं चारु शोभनं भाषते। स्निग्धमूर्तिर्निर्मलशरीरा। रुचिराननेक्षणा रुचिरं शोभनमाननं मुखं तथेक्षणे यस्या सा महीक्षितां राज्ञां सुचिरं चिरकालं श्रियं लक्ष्मी यशः कीर्ति विजयं विशेषेण जयं वीर्यसम्पदमैश्वर्य च ददाति।।

४. कूर्मलक्षणाध्यायः

स्फटिकरजतवर्णो नीलराजीविचित्रः कलशसदृशमूर्तिश्चारुवंशश्च कूर्मः।
अरुणसमवपुर्वा सर्षपाकारचित्रः सकलनृपमहत्त्वं मन्दिरस्थः करोति।।१।।

यः कूर्मः स्फटिकवर्णः स्फटिकोपलाभः। रजतवर्णो रूप्याकृतिः। नीलाभिर्नीलवर्णाभी राजीभिर्ले-खाभिर्विचित्रो विचित्रितः। कलशसदृशमूर्तिः कुम्भतुल्यशरीरः। चारुवंशः, वंशः पृष्ठास्थि चारु शोभनं यस्य। नात्युच्च इत्यर्थः। अथवारुणसमवपुलोहितशरीरः। सर्षपाकारैः श्वेतैर्बिन्दुश्चित्रश्चित्रितः। स मन्दिरस्थो गृहे समवस्थितः सकलनृपाणां समस्तराजानां महत्त्वं प्रभुत्वं महिमानं करोति। राजाधिराजतां करोतीत्यर्थः।।

अन्यदप्याह-

अञ्जनभृङ्गश्यामतनुर्वा बिन्दुविचित्रोऽव्यङ्गशरीरः।
सर्पशिरा वा स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्धयै।।२।।

अञ्जनं प्रसिद्धं कज्जलम्। भृङ्गो भ्रमरः। अञ्जनभृङ्गवत् श्यामा तनुः शरीरं यस्य। बिन्दुविचित्रो बिन्दुभिस्तिलकैर्विचित्रितः। अव्यङ्गशरीरः, अव्यङ्गं परिपूर्णावयवं शरीरं देहो यस्य। सर्पशिरा वा सर्पशदृशमूर्धा वा। यश्च स्थूलगलो विस्तीर्णकण्ठः। सोऽपि कूर्मो नृपाणां राज्ञां राष्ट्रस्य विवृद्धयै वर्धनाय भवति।।

अन्यदप्याह-

वैदूर्यत्विट् स्थूलकण्ठस्त्रिकोणो गूढच्छिद्रश्चारुवंशश्च शस्तः।
क्रीडावाप्यां तोयपूर्णो मणौ वा कार्यः कूर्मो मंगलार्थे नरेन्द्रैः।।३।।

वैदूर्यत्विड् वैदूर्यसदृशकान्तिः स्थूलकण्ठः पीनगलः। त्रिकोणः शृङ्गाटकाकृतिः। गूढच्छिद्रो गूढानि अदृश्यानि छिद्राणि रन्ध्राणि यस्य। चारुवंशः शोभनपृष्ठास्थि। स शस्तः शोभनः। य एवंवधिः कूर्मः स नरेन्द्रै सजभिर्मङ्गलार्थं क्रीडावाप्यां क्रीडापुष्करिण्यां मणौ वा कूपाधोभागे तोयपूर्णं कार्यः। तथा च गर्गः – **बृ.सं., पृ-१८१**

५. छागलक्षणाध्यायः

छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते।

धन्याः स्थाप्या वेश्मनि सन्त्याज्याः सप्तदन्ता ये।।१ ।।

छागनामजानां शुभाशुभलक्षणमभिधास्ये कथयिष्ये। ये च छागा नवदशाष्टदन्ता नवदन्ता दशदन्ता अष्टदन्ता वा ते धन्या शोभनाः, वेश्मनि गृहे स्थाप्याः। ये च सप्तदन्ताः सप्तरदास्ते सन्त्याज्याः।।

अन्यदप्याह-

दक्षिणपार्श्वे मण्डलमसितं शुल्लस्य शुभफलं भवति।

ऋष्यानिभकृष्णलोहितवर्णानां श्वेतमातिशुभदम्।।२ ।।

स्तनवदलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः।

एकमणिः शुभफलृद्धन्यतमा द्वित्रिमणयो ये।।३ ।।

मुण्डाः सर्वे शुभदाः सर्वसिताः सर्वकृष्णदहाश्च।

अर्धासिताः सितार्धा धन्याः कपिलार्धकृष्णाश्च।।४ ।।

विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः।

स शुभः सितमूर्धा वा मूर्धनि वा कृत्तिका यस्य।।५ ।।

योऽजश्छागो यूथस्य वृन्दस्याग्रे विचरति गच्छति प्रथममादौ वा योऽम्भो जलवगाहते गृह्णाति पिबति स शुभः शस्तः। अथवा सितमूर्धा श्वेतशिश यः सोऽपि शुभः। अथवा मूर्धनि मस्तके यस्य कृतिकास्तिलका भवन्ति। कृत्तिकानां षट्त्वात् षट्तिला इत्यर्थः। एषामन्यतमलक्षणयुक्तः कुट्टकख्यः। तथा च गर्गः- **बृ.सं., पृ-१८३**

यूथाग्रे यश्च चरति यश्चादौ स्पर्शयेज्जलम्।

मूर्ध्नि षट्तिलका यस्य सोऽसो यूथविवर्धनः।। इति।।

अथ कुटिलस्याह-

सपृषतकण्ठशिरा वा तिलपिष्टनिभश्च ताम्रक् शस्तः।

कृष्णचरणाः सितो वा कृष्णो वाश्वेतचरणो यः।।६ ।।

यश्च सपृषतकण्ठः पृषतास्तिलकास्ते कण्ठे गले यस्य। सपृषतशिरा वा तिलमूर्धा वा। तिलपिष्टनिभस्तिलपिष्टसदृशवर्णः। शुक्लपीतव्यामिश्रवर्ण इत्यर्थः। ताम्रदृग्लोहितनेत्रः स शस्तःशुभः। अथवा यः कृष्णचरणोऽसितपादः सितवर्णो वा यः सोऽपि शुभः। अथवा यः कृष्णवर्णः श्वेतचरणः सितपादः सोऽपि शुभः। एषामन्यतमलक्षणयुक्तः कुटिलाख्यः। तथा च गर्गः- **बृ.सं., पृ-१८३**

अथ जटिलक्षणमाह-

य कृष्णाण्डःश्वेतो मध्ये कृष्णेन भवति पट्टेन।

यो वा चरति सशब्दं मन्दं च स शोभनश्छागः।।७।।

यश्छागः कृष्णाण्डोऽसितवृषणः। श्वेतः शुक्लवर्णः। मध्ये मध्यभागे कृष्णेन पट्टेन पर्याणाकृतिना युक्तो भवति स शुभः। यो वाऽजः सशब्दं शब्दसहितं मन्दमलसं च चरति गच्छति स छागः शोभनश्च शस्तः। एषां लक्षणानामन्यतमलक्षणयुक्तो जटिलाख्यः। तथा च गर्गः- **बृ.सं., पृ-१८४**

अथ वामनलक्षणमाह-

ऋष्यशिरोरुहपादो यो वा प्राक् पाण्डुरोऽपरे नीलः।

स भवति शुभकृच्छागः श्लोकश्चाप्यत्र गर्गोक्तः।।८।।

ऋष्यशिरोरुहो नीलवर्णमूर्धा। ऋष्यः प्राणी स च लोके ऋक्ष इत्युच्यते। स च नीलवर्णो भवति। तथा च व्यासमुनिः-

तथा च

तस्मान्नीलशिरा नीलपादश्च सोऽपि शुभकृत्। यो वा प्राकृ पूर्वभागे पाण्डुर ईष्च्छुक्लः। अपरे पश्चिमभागे नीलः सोऽपि शुभकृत् छागः। एषामन्यतमलक्षणयुक्तो वामनाख्यः। तथा च गर्गः- **बृ.सं., पृ-१८४**

अत्रास्मिन्नर्थे गर्गोक्तोऽयं श्लोको ज्ञापकों यं साक्षात् पठति।।८।।
तं चाह-

कुट्टकः कुटिलश्चैव जटिलो वामनस्तथा।

ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति ते।।९।।

पूर्वलक्षणोक्तः कुट्टकः कुटिलो वामनश्च तथा तेनैव प्रकारेणैते चत्वारश्छागाः श्रियः पुत्रा लक्ष्मीसुताः। अलक्ष्मीके लक्ष्मीरहिते स्थाने न वसन्ति न स्थितिं कुर्वन्ति। सलक्ष्मीके स्थाने निवसन्तीत्यर्थः।

एवं शुभानां छागानां लक्षणमुक्त्वाऽधुनाऽप्रशस्तानां लक्षणमाह-

अथाप्रशस्ताः खरतुल्यनादाः प्रदीप्तपुच्छाः कुनखा विवर्णाः।

निकृत्तकर्णा द्विपमस्तकाश्च भवन्ति ये चासिततालुजिह्वाः।।१०।।

अथानन्तरमप्रशस्ताश्छागा भवन्ति। कीदृशाः? खरतुल्यनादा गर्दभसदृशरवाः। प्रदीप्त पूच्छाः प्रदीप्तं पुच्छं लाङ्गूलं वक्रमत्युच्चं वा येषाम्। कुनखाः कुत्सितनखाः। विवर्णा विगतवर्णा अशुभवर्णाः। निकृत्तकर्णाः छिन्नेश्रोत्राः। छिन्नानुरूपाभ्यां कर्णाभ्यां द्विपसमस्तका गजसदृशमूर्धानः। ये चासिततालुजिह्वाः। कृष्णतालवः कृष्णरसना ये भवन्ति तेऽप्य- प्रशस्ताः।।

अथ शुभलक्षणमाह-

वर्णैः प्रशस्तैर्मणिभिः प्रयुक्ता मुण्डाश्च ये ताम्रविलोचनाश्च।

ते पूजिता वेश्मनि मानवानां सौख्यानि कुर्वन्ति यशः श्रियं च।।११।।

छागाः प्रशस्तैर्वर्णैः दक्षिणपार्श्वे मण्डलमसितं शुक्लस्यं शुभफलं भवति, एवंविधैर्वर्णैर्युक्ताः। मणिभिश्चैकेन द्वाभ्यां त्रिभिर्वा युक्ताः। ये च मुण्डा विषाणरहिताः। ये च ताम्रविलोचना लोहितनयनास्ते छागा मानवानां मनुष्याणां वेश्मनि गृहे पूजिताः शुभाः सौख्यानि निर्दुखतां यशः कीर्तिं श्रियं लक्ष्मीं च कुर्वन्ति विदधति।।

६. अश्वलक्षणाध्यायः

तत्र प्रदेशज्ञानं विना न किञ्चिद् ज्ञायते, तस्मात् प्रदेशा ध्यायः प्रथमत एव लिख्यते - तत्रादावेवाश्वलक्षणमाह-

दीर्धग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रताल्वोष्टजिह्वः

सूक्ष्मत्वक्केशवालः सुशफगतिमुखो ह्रस्वकर्णोष्ठिपुचछाः।

जङ्घाजानूरुवृत्तः समसितदशनश्चारुसंस्थानरूपो

वाजी सर्वाङ्गशुद्धो भवति नरपतेः शत्रुनाशाय नित्यम्।।१।।

दीर्घग्रीवाक्षिकूटः, दीर्धा ग्रीवा शिरोधरा यस्य, तथा दीर्घाक्षिकूटः अक्षिकूटं दृगाश्रयः। त्रिकहृदयपृथुः त्रिकं कटिभारः , हृदयं हत्स्थानम् , एते पृथुनी विस्तीर्णे यस्य। ताम्रता ल्वोष्ठजिह्वः ताम्रवर्णावोष्ठावधरौ यस्य ताल्वास्यपृष्ठं जिह्वा रसना च यस्य। सूक्ष्मत्वक्केशवालः त्वक् चर्म, केशा मूर्धजाः, वालः पुच्छवालः, एते सूक्ष्मा यस्य। सुशफगतिमखः शफाः खुराः, गतिर्गमनम् , मुखं वक्त्रमेतानि सुप्रमाणेन गतिलक्षणेन युक्तानि यस्य सुशोभनत्वात्। ह्रस्वकर्णोष्ठपुच्छः कर्णौ श्रोत्रे, ओष्ठ उत्तरोष्ठः, पुच्छं पुच्छमूलं यत्रास्थिवाला लग्ना भवन्ति। एतानि ह्रस्वान्यदीर्धाणि यस्य। जङ्घाजानुरुवृतो जङ्घे सुप्रसिद्धे, जानुनी ऊरू च एतानि वृत्तानि परिवर्तुलानि यस्य। समसितदशनः समास्तुल्याः सिताः श्वेतवर्णा दशना दन्या यस्य। चारुसंस्थानरूप : चारु दर्शनीयं संथानमाकारो रूपं शरीरशोभा यस्य। एवंविधो वाजी अश्वः सर्वाङ्गशुद्धः सर्वावयवलक्षणैर्निदोषैर्युक्तो नरपते राज्ञो नित्यं सर्वकालं शत्रुनाशाय रिपुवधाय भवतीत्यर्थः। तथा च भगवान् पराशरः- **बृ.सं., पृ-१८९**

अथाशुभानां रोमावर्तानां लक्षणमाह-

अश्रुपातहनुगण्डहृन्दलप्रोथशङ्खकटिवस्तिजानुनि

मुष्कनाभिककुदे तथा गुदे सव्यकुक्षिचरणे तथाशुभाः।।२।।

ये प्रपाणगलकर्मसंस्थिताः पृष्ठमध्यनयनोपरि स्थिताः।

ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः।।३।।

तेषां प्रपाण एको ललाटकेशेषु च घ्रुवावर्त्ताः।

रन्धोपरन्ध्रमूर्धनि वक्षसि चेति स्मृतौ द्वौ द्वौ।।४।।

षड्भिर्दन्तैः सितानैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः

सन्दंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्र्यब्धिपञ्चाब्दिकाश्चः।

सन्दंशानुक्रमेण त्रिकपरिगणिताः कालिकाः पीतशुल्काः

काचा मक्षीकशङ्खावटचलनमतो दन्तपातं च विद्धि।।५।।

अश्वानामधो दन्तपाल्यां दंष्ट्राद्वयमध्ये षड्दन्ता व्यञ्जनिनो भवन्ति, षड्भिर्दन्तैरग्रवर्तिभि- र्द्वयोरपि दन्तपाल्योः सिताभैः श्वेतच्छाविभिर्हयशिशुर्बालोऽश्वो भवति। एकवर्ष इत्यर्थः। तैरेव षड्निर्भर्दन्तैः कषार्यः कृष्णलोहितवर्णैर्द्विवर्षोऽश्वो भवति। द्वयोरपि दन्तपाल्योः सममध्यवर्तिनौ द्वौ द्वौ दन्तौ सन्दंशावुच्येते। तत्पार्श्ववर्तिमेकैकं मध्यमम्। द्वयोरपि पार्श्वद्वयवर्तिनमेकैकमन्त्यसंज्ञम्। एवं सन्दंशैः पतितसमुदितैः पतित्वा पुनरप्युत्थितैस्त्रयाब्दिकोऽश्वः। त्रीणि वर्षाणि प्रमाणमस्य त्र्याब्दिकः। एवं मध्यमैर्दन्तैः पतितसमुदितैरब्धिसंख्यानि वर्षाणि प्रमाणमस्य। अन्त्यैः समुदितैः पञ्चाब्दिकः। सन्दंशानु-क्रमेण सन्दंशपरिपाटया कालिकाद्या व्यञ्जनिनस्त्रिकपरिगणिताः कार्याः। त्रिभिस्त्रिभिर्विर्षेर्गण-नीयाः। एतदुक्तं भवति–यदा सन्दंशदन्तयो कालिका कृष्णो बिन्दुर्भवति, तदा षडब्दाः। ताम्रसदृशा-कृतिरासां विज्ञेया। एवं मध्यमैः सकालिकैः सप्ताबदाःाअन्त्यैरष्टाब्दाः। एवं प्रतिचिह्नसन्दंशानुक्रमेण त्रिवर्षगुणितं कार्यम्। तेन सन्दंशानुक्रमेण पीतायामेकादशाब्दाः। पीताः पीतवर्णाः। एवं शुक्लायां चतुर्दशाब्दाः। शुक्लाः शुक्लवर्णाः। काचायां सप्तदशाब्दाः। काचाः काचवर्णाः। मक्षीकायां विंशत्यब्दाः। मक्षीका तदाकृतिः। शङ्खायां त्रयोविशंत्यब्दाः। शङ्खा शङ्खाकृतिरेव। अवटं छिद्रम्। तेन षड्विंशत्यब्दाः। चलनं कम्पनं तनैकोन-त्रिंशदब्दाः। अतोऽनन्तरं दन्तपातः पतनं तेन द्वात्रिंशदब्दाः। एवं क्रमेण विद्धि जानीहि। तथा च वररुचिः-

पराशरमहर्षिणा अश्वानामायुष्प्रमाणपरिज्ञानमभिहितम्, तद्यथा –

अथ रेखा दीर्धा गम्भीरा अविच्छिन्नास्तिस्त्रः प्रोथे यस्य तस्यायुर्वर्षाणि त्रिंशत्। द्वाभ्यां विंशतिः। दशैकया च। दक्षिणेनाभिवृत्तया द्वादश। वंशाग्रमनुगतया अष्टादश। ह्रस्वजिह्यवक्रविच्छि-न्नाव्यक्तरू-क्षकबन्धकाकपादाकारया जघन्यमायुः इति।।

७. हस्तिलक्षणाध्यायः

तत्र गजानां चतस्त्रो जातयो भवन्ति – भद्र-मन्द मृगमिश्राख्याः। तत्रादावेव भद्रलक्षणमाह-

मध्वाभदन्ताः सुविभक्तदेहा न चोपदिग्धा न कृशाः क्षमाश्च।
गात्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः।।१।।

ये गजा मध्वाभदन्ता मधुसदृशी आभा कान्तिर्येषाम्। सुविभक्तदेहाः शोधनं कृत्वा विभक्तो देहः शरीरं येषाम्। अवयवप्रभिागसम्पन्ना इत्यर्थः। न चोपदिग्धाः , नातिस्थूलाः। न कृशा नातिदुर्बलदेहाः। क्षमाश्च कार्ययोग्याः। गात्रैश्च शरीरावयवैः समैस्तुल्यैर्युक्ताः। चापसमानवंशाः चापं शरासनं तत्समानां वंशास्तुत्तुल्यपृष्ठाः। वराहतुल्यैः सूकरप्रतिमैश्च जघनैः कटिभागैरैभिः परिवर्तुलैस्तैर्भद्रा गजाः।।

अथ मन्दलक्षणमाह-

वक्षोऽथ कक्षावलयः श्लथाश्च लम्बोदरस्त्वग्बृहती गलश्च।
स्थूला च कुक्षिः सह पेचकेन सैंही च दृङ्मन्दमतङ्गजस्य।।२।।

मृगास्तु हस्त्राधरबालमेडढ्रास्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः।
स्थूलेक्षणाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्रचिह्ना।।३।।

पञ्चोन्नतिः सप्त मृगस्य दैर्ध्यमष्टौ च हस्ताः परिणाहमानम्।
एकद्विवृद्धावथ मन्दभद्रौ सङ्कीर्णनागोऽनियतप्रमाणः।।४।।

मृगाख्यस्य गजस्य पञ्चोन्नतिः पञ्च हस्ता औच्च्यम्। पुच्छमूलात् कुम्भान्तं यावत् सप्तहस्ता दैर्ध्यम्। अष्टौ च हस्ताः परिणाहमानं परिणाहो मध्यपरिधिः , तस्य मानमष्टहस्तप्रमाणम्। एकद्विवृद्धाविति। एकवृद्धया मन्दः, द्विवृद्धया भद्रः। एतदुक्तं भवतिमन्दस्य षडुन्नतिः, अष्टौ दैर्ध्यम्। नव परिणाहः भद्रस्य सप्तोन्नतिः, नव दैर्ध्यम्, दश परिणाहः। सङ्कीर्णनागः सङ्कीर्णाख्यो गजः। अनियतप्रमाणो-ऽनिश्चितपरिमाण इत्यर्थः। व्यामिश्रप्रमाणो भवति। त्रयाणां भद्रादीनां यल्लक्षणमुक्तं तन्मिश्रितस्य भवति। तथा च पराशरः-

बृ.सं., पृ-१९६

अथ तेषां वर्णमदलक्षणमाह-

भद्रस्य वर्णो हरितो मदश्च मन्दस्य हारिद्रकसन्निकाशः।
कृष्णो मदश्चाभिहितो मृगस्य सङ्कीर्णनागस्य मदो विमिश्रः।।५।।

भद्राख्यस्य गजस्य वर्णो हरितः शुकवर्णः, मदश्च हरितः। मन्दगजस्य मदो वर्णश्च हारिद्रकसन्निकाशः, हरिद्रया रक्तं हारिद्रकं तत्सन्निकाशस्तत्सदृशः। पीताभो वर्णो मदश्च। मृगाख्यस्य गजस्य कृष्णवर्णाभो मदः। चशब्दाद्वर्णोऽभिहित उक्तः। सङ्कीर्णनागस्य सङ्कीर्णाख्यस्य गजस्य मदो वर्णश्च विमिश्रो व्यामिश्रवर्णो भवति।।

अथ गजानां शुभानि लक्षणान्याह-

ताम्रोष्ठातालुवना : कलविङ्कनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः।
चोपोन्नतायतनिगूढनिमग्रवंशास्तन्वेकरोमचितकूर्मसमानकुम्भाः।।६ ।।
विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नताद्विनवविंशतिभिर्नखैश्च।
रेखात्रयोपचितवृत्तकराः सुवाला धन्याः सुगन्धिमदपुष्करमारुताश्च।।७ ।।

दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनादबृंहितः।
बृहदायतवृत्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः।।८ ।।

निर्मदाभ्यधिकहीननखाङ्गन् कुब्जवामनकमेषविषाणान्।
दृश्यकोशफलपुष्करहीनान् श्यावनीलशबलासिततालून्।।९ ।।
स्वल्पवक्त्ररुहमत्कुणषण्ढान् हस्तिनी च जगलक्षणयुक्ताम्।
गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते।।१० ।।

संक्षिप्तवक्षोजधनः पृष्ठमध्यसमुन्नतः।
प्रमाणहीनस्तन्नाभिः स कुब्जो वारणाधमः।।

तथा यश्च मेषविषाणो मेषोऽजस्तस्य विषाणे शृङ्गे तत्तुल्ये विषाणे दन्तौ यस्य। तथा च-

तान् कुब्जवामनकमेषविषाणान्। दृश्ये दृश्यमाने कोशफले वृषणौ येषाम्। पुष्करं करप्रान्तः पद्माकारं तेन हीनान् रहितान्। श्यावं मलिनं नीलं नीलाकारं शवलं व्यामिश्रं शुक्लकृष्णवर्णम्। असितं कृष्णं वा तालु येषां तानपि। तथा स्वल्पा वक्त्ररुहा दन्ता मुखलोमानि वा येषाम्। मत्कुणःयश्च दन्तरहितः। तथा च लक्षणम्-

एवंविधा ये गजास्तान् नृपती राजा परदेशमन्यदेशं प्रापयेन्नयेत्। तथा हस्तिनी करिणीं च गजलक्षणयुक्तां स्थुलदन्तां समदानित्यर्थः। गर्भिणी तद्राष्ट्रस्थितां गर्भसंयुक्तां च नृपतिः परदेशं प्रापयेत्। यतस्ते गजा अतिविरूपफला अतिविरूपं दृष्टफलं येषां ते तथाभूता इति।।

८. श्वचक्राध्यायः

नृतुरगकरिकुम्भपर्याणसक्षीरवृक्षेष्टकासञ्चयच्छत्रशस्यासनोलुखलानि ध्वजं चामरं शाद्वलं पुष्पित्तं वा प्रदेशं यदा श्वासमूत्र्याग्रतो याति यातुस्तदा कार्यसिद्धिर्भवेदार्द्रके गोमये मिष्टभोज्यागमः शुष्कसम्मूत्रणे शुष्कमन्नं गुडो मोदकावाप्तिरेवाथवा।।

ना मनुष्यः। तुरगोऽश्वः। करी हस्ती। कुम्भो घटः। पर्याणं प्रसिद्धम्। सक्षीरवृक्षोऽर्कादिः। इष्टमासञ्चय इष्टकाकूटः। छत्रमातपत्रम्। शय्या आस्तरणम्। आसनं पट्टादि। उलूखलं प्रसिद्धमेव। तथा ध्वजं चिह्नम्। चामरं बालव्यजनम्। शाद्वलं दूर्वा। पुष्पितं वा प्रदेशं सञ्जातपुष्पस्थानम्। यदा श्वा सारमेयः। अवमूत्र्य मूत्रेण सिक्त्वा यातुर्गच्छतोऽग्रतः पुरो याति गच्छति तदा कार्यस्याभीष्टस्य सिद्धिर्भवेत् स्यात्। उक्तं च-

आर्द्रके गोमय इति। आर्द्रके सरसे गोमये सम्मूत्रणे मिष्टभोज्यस्यागमो लाभः। शुष्कगोमयसम्मूत्रणे शुष्कमंत्र गुडो मोदकानामवाप्तिर्लाभोऽथवा भवति।।

अन्यदप्याह-

अथ विषतरुकण्टकीकाष्ठपाषाणशुष्कद्रुमास्थिश्मशानानि मूत्र्यावहत्याथवा यायिनोऽग्रेसरोऽ-नष्टमाख्याति शय्याकुलालादिभाण्डान्यभुक्तान्यभिन्नानि वा मूत्रयन् कन्यकादोषकृद्भुज्यमानानि चेद् दुष्टतां तद्गृहिण्यास्तथा स्यादुपानत्फलं गोस्तु सम्मूत्रणेऽवर्णजः सङ्करः।।

गमनमुखमुपानहं सम्प्रगृह्योपतिष्ठेद्यदा स्यात्तदा सिद्धये मांसपूर्णानने ऽर्थाप्तिरार्द्रेण चास्थ्ना शुभं साग्न्यलोन शुष्कण चास्थ्ना गृहीतेन मृत्युः प्रशान्तोल्मुकेनाभिघातोऽथ पंसः शिरोहस्तपादादिवक्त्रे भुवोऽभ्यागमो वस्त्रचीरादिभिर्व्यापदः केचिदाहुः सवस्त्रे शुभम्।

प्रविशति तु गृहं सशुष्कास्थिवक्त्रे प्रधान्स्य तस्मिन् वधः शृङ्खलाशीर्णवल्लीवरत्रादि वा बन्धनं चोपगृह्योपतिष्ठेद्यदा स्यात् तदा बन्धनं लेढि पादौ विधुन्वन् स्वकर्णावुपर्याक्रमंश्चापि विध्नाय यातुर्विरोधे विरोधस्तथा स्वाङ्गकण्डूयने स्यात् स्वपंश्चोर्ध्वपादः सदा दोषकृत्।।१।।

गमनमुखमिति। यदोपानहं मुखेन सम्प्रगृह्योपतिष्ठेद् गमनमुखं यियासुमुपतिष्ठेत् समीपे तस्य तिष्ठेत् तदा सिद्धयेऽर्थानां स्याद्भवेत्। मांसपूर्णानने आमिषपूरितवदेन अर्थाप्तिर्धनानां लाभो भवति। आर्द्रेण सरसेनास्थ्ना पूर्णानने शुभम्। अग्निना अलातेन दग्धकाष्ठेन शुष्केण नीरसेन चास्थ्ना गृहीतेन ।

तथा स्वाङ्गस्यात्मीयावयवस्य कण्डूयने यातुर्विरोधः स्यात्। ऊर्ध्वपाद ऊर्ध्वचरणः स्वपन् तदा सर्वस्मिन् भकाले गमने यातुरेकदेशस्थस्य वा दोषकृद्भवेत्।।

अथ दिग्विभागेन शुनः फलमाह-

सूर्योदयेऽर्काभिमुखो विरौति ग्रामस्य मध्ये यदि सारमेयः।
एको यदा वा बहवः समेताः शंसन्ति देशाधिपमन्यमाशु।।२।।

सारमेयः श्वा ग्रामस्य मध्ये सूर्योदये अर्कोद्गमनकाले यद्यर्काभिमुख आदित्यभिमुखो विरौति शब्दं करोति। एकोऽथवा बहवो यदा प्रभूताः समेताः सहितास्तदाऽऽशु शीघ्रं देशाधिपं देशस्वामिनमन्यं द्वितीयं शंसन्ति।।

अन्यदप्याह-

सूर्योन्मुखः श्वानलदिक्स्थितश्च चौरानलत्रासकरोऽचिरेण।
मध्याह्नकालेऽनलमृत्युशंसी सशोणितः स्यात् कलहोऽपराह्णे।।३।।

रुवन् दिनेशाभिमुखोऽस्तकले कृषीवलानां भयमाशु दत्ते।
प्रदोषकालेऽनिलदिङ्मुखश्च दत्ते भयं मारुततस्करोत्थम्।।४।।

उदङ्मुखश्चापि निशार्धकाले विप्रव्यथां गोहरणं च शास्ति।
निशावसाने शिवदिङ्मुखश्च कन्याभिदूषानलगर्भपातान्।।५।।

निशार्धकाले अर्धरात्रसमये उदङ्मुख उत्तराभिमुखो भवन् विप्रव्यथां ब्राह्मणपीडां गोहरणं गवां परैरपहरणं शास्ति कथयति। निशावसाने रात्र्यन्ते शिवदिङ्मुख ऐशान्यभिमुखो भवन् कन्याभिदूषं कन्यां कुमारीं दूषयति, अनलमग्निं गर्भपातं गर्भपतनं च स्त्रीणां शास्ति।

अन्यदप्याह-

उच्चैः स्वराः स्युस्तृणकूटसंस्थाः प्रासादवेश्मोत्तमसंस्थिता वा।
वर्षासु वृष्टिं कथयन्ति तीव्रामन्यत्र मृत्युं दहनं रुजश्च।।६।।

तृणकूटस्तुणराशिस्तत्र संस्थिताः। प्रासादः प्रसिद्धः। उत्तमं वेश्म प्रधानगृहम्। एतेषु संस्थिता वा यद्युच्चैः स्वरास्तीव्रशब्दाः स्युर्भवेयुः। वर्षासु वर्षाकाले तीव्रां वृष्टिं कथयन्ति उद्दिशन्ति। अन्यत्र वर्षाभ्योऽन्यस्मिन् ऋतौ मृत्युं मरणं दहनमग्निं रुजो रोगांश्च कथयन्ति।।

अन्यदप्याह-

प्रावृट्कालेऽवग्रहेऽम्भोऽवगाह्य प्रत्यावर्तै रेचकैश्चाप्यभीक्ष्णम्।
आधुन्वन्तो वा पिबन्तश्च तोयं वृष्टिं कुर्वन्त्यन्तरे द्वादशाहात्।।७।।

द्वारे शिरो न्यस्य बहिः शरीरं रोरूयते श्वा गृहिणीं विलोक्य।
रोगप्रदः स्यादथ मन्दिरान्तर्बहिर्मुखो वक्ति च बन्धकी ताम्।।८।।

कुडयमुत्किरति वेश्मनो यदा तत्र खानकभयं भवेत्तदा।
गोष्ठमुत्किरति गोग्रहं वदेद्धान्यलब्धिमपि धान्यभूमिषू।।९।।

एकेनाक्ष्णा साश्रुणा दीनदृष्टिर्मन्दाहारो दुःखकृत्तद्गृहस्य।
गोभिः साकं क्रीडमाणः सुभिक्षं क्षेमारोग्यं चाभिद्यते मुदञ्च।।१०।।

एकेनाक्ष्णा एकेन नयने चाश्रुणाश्रुयुक्तेनोपलक्षितः स च दीनदृष्टिर्मन्दाहारोऽल्पभोजनो यदि भवति, तदा तद्गृहस्य तस्य वेश्मनो दुःखकृद्भवति। गोभिः साकं गोभिः सह क्रीडमाणः सुभिक्षमभिधत्ते करोति। तथा क्षेमारोग्यं मुदं च हर्षमभिद्यत्ते करोति।।

अन्यदप्याह-

वामं जिघ्रेज्जानु वित्तागमाय स्त्रीभिः साकं विग्रहो दक्षिणञ्चेत्।
ऊरुं वामं चेन्द्रियार्थोपभोगः सव्यं जिघ्रेदिष्टमित्रैर्विरोधः।।११।।

सारमेयो यातुर्वामं जानु यदि जिघ्रेत् तदा वित्तागमाय धनलाभाय भवेत्। यदा दक्षिणं जानु जिघ्रेत तदा स्त्रीभिः साकं योषिद्भिः सह विग्रहो भवति। वाममूरुं यदि जिघ्रेत् तदा इन्द्रियार्थोपभोगो भवति। इन्द्रियाणां बुद्धीन्द्रियाणां येऽर्था विषयास्तुदुपभोगो भवति। स्वयं दक्षिणमूरुं जिघ्रेतं तदा इष्टैर्बन्धुभिर्मित्रैः सुहृद्भिौं सह विरोधो भवति।।

अन्यदप्याह-

पादौ जिघ्रेद्यायिनश्चेदयात्रां ग्राहार्थाप्तिं वाञ्छितां निश्चलस्य।
स्थानस्थस्योपानहौ चेद्विजिघ्रेत्क्षिप्रं यात्रां सारमेयः करोति।।१२।।

उभयोरपि जिघ्रणे हि बाह्वोर्विज्ञेयो रिपुचौरसम्प्रयोगः।
अथ भस्मनि गोपयीत भक्षान् मांासास्थीनि च शीघ्रमग्निकोपः।।१३।।

ग्रामे भषित्वा च बहिः श्मशाने भषन्ति चेदुत्तमपुंविनाशः।
यियासतश्चाभिमुखो विरौति यदा तदा श्वा निरुणद्धि यात्राम्।।१४।।

उकारवर्णे विरुतेऽर्थसिद्धरोकारवर्णेन च वामपार्श्वे।
व्याक्षेपमौकाररुतेन विन्द्यान्निषेधकृत्सर्वरुतैश्च पश्चात।।१५।।

खंखेति चोच्चैश्च मुहुर्मुहुर्ये रुवन्ति दण्डैरिव ताड्यमानाः।
श्वानोऽभिधावन्ति च मण्डलेन ते शून्यतां मृत्युभयञ्च कुर्युः।।१६।।

ये श्वानः कुक्कुराः उच्चैः कृत्वा मुहुर्मुहुः प्रतिक्षणं खंखेति रुवन्ति शब्दं कुर्वन्ति तथैव मुहुर्मुहु रुवन्ति। अथवा मण्डलेन मण्डलाकृतिना समूहेन परिवर्तुलेन धावन्ति गध्छन्ति ते नगरस्य शून्यतां शून्यत्वं मृत्युभयं मरणभयं च कुर्युः।।

अन्यदप्याह-

प्रकाश्य दन्तान् यदि लेढि सृक्विणी तदाशनं मृष्टमुशन्ति तद्विदः।
यदाननं लेढि पुनर्न सुक्विणी प्रवृत्तभोज्येऽपि तदान्नविध्नकृत्।।१७।।

ग्रामस्य मध्ये यदि वा पुरस्य भषन्ति संहत्य मुहुर्मुहुर्ये।
ते क्लेशशमाख्यान्ति तदीश्वरस्य श्वारण्यसंस्थो मृगवद्विचिन्त्यः।।१८।।

वृक्षोपगे क्रोशति तोयपातः स्यादिन्द्रकीले सचिवस्य पीडा।
वायोर्गृहे सस्यभयं गृहन्तः पीडा पुरस्यैव च गोपुरस्थे।।१९।।
भयं च शय्यासु तदीश्चराणां याने भषन्तो भयदाश्च पश्चात्।
अथापसव्या जनसन्निवेश भयं भषन्तः कथयन्तरीणाम्।।२०।।

वृक्षोपग इति। वृक्षोपगे वृक्षसमीपवर्तिनि सारमेये क्रोशति सति तोयपातो जलपातः स्याद् भवत्। देवो वर्षतीत्यर्थः। इन्द्रकीले अर्गलासमीपे सचिवस्य मन्विणः पीडा स्याद् भवेत्। गृहान्तर्गृहमध्ये वायोर्गृह वा वायव्यां दिशि यदि क्रोशति, तदा सस्यस्य भगं भवति। गोपुरस्थे पुरद्वारस्थिते पुरस्यैव पीडा भेवत्।

भयं च शय्यास्विति। शय्यास्वास्तरणेषु तदीश्वराणां शयनस्वामिनां भयं कुर्वन्ति। याने यात्रायां पश्चाद्भषन्तो यातुरेव भयदा भयं ददति। अथशब्दश्चार्थे। जनसन्निवेश जनसन्निधौ जनानामेवापसव्या वामभागस्था भषन्तोऽरीणां शत्रूणां सम्बन्धि भयं प्रवदन्ति कथग्रन्तीति।।

९. शिवारुताध्यायः

तत्रादावेव श्वदतिदेशं विशेषं चाह–

श्वभिः शृगालाः सदृशाः फलने विशेष एषां शिशिरे मदाप्तिः।

हूहू रुतान्ते परतश्च टाटा पूर्णः स्वरोऽन्ये कथिताः प्रदीप्ताः।।१ ।।

शृगालाः स्वभिः सारमेयैः फलेन सदृशास्तुल्याः। यादृशं चेष्टितं फलं च शुनामुक्तं तादृशमेव शृगालानां विज्ञातव्यम्, किन्त्वयं विशेषः– एषां शृगालानां शिशिरे माघफाल्गुनयोर्मदाप्तिर्मदप्रादुर्भावो भवति। तस्मात् तेषां शिशिरे निष्फलता। रुतान्ते रुतावसाने हूहूशब्दः, परतोऽनन्तरं टाटा एष पूर्णः स्वरः। अन्य सर्वे स्वराः प्रदीप्ता उक्तः कथिताः।

अथात्रैव लोमाशिकायाश्चेष्टितमाह–

लोमाशिकायाः खलुः कक्कशब्दः पूर्णः स्वभावप्रभवः स तस्याः।

येऽन्ये स्वरास्ते प्रकृतेरपेताः सर्वे च दीप्ता इति सम्प्रदिष्टाः।।२ ।।

खलुशब्दश्चार्थे। लोमाशिकायाश्च कक्कशब्दः पूर्णः स च लोमाशिकायाः स्वभावप्रभवः स्वभावादेव प्रभवत्युत्पद्यते। येऽन्ये स्वराः शब्दास्ते प्रकृतेः स्वभावतोऽपेता अपगतास्ते च सर्वे दीप्ताः सम्प्रदिष्टाः कथिताः।।

अथ शिवाचेष्टितमाह–

पूर्वोदीच्योः शिवा शस्ता शान्ता सर्वत्र पूजिता।

धूमिताभिमुखी हन्ति स्वरदीप्ता दिगीश्वरान्।।३ ।।

शिवा शृगालिका पूर्वोदीच्योः पूर्वस्यामुत्तरस्यां च दिशि शस्ता शुभफलदा। सा च शान्ता शान्तरवा शान्तदिक्स्था च सर्वत्र सर्वस्यां दिशि पूजिता शुभदा। यां दिशमादित्यो यास्यति सा धूमिता। धूमिताभिमुखी शिवा स्वरदीप्ता च क्रूरशब्दा दिगीश्वरान् हन्ति। तस्यां दिशि योऽधिपतिस्तं विनाशयतीत्यर्थः।।

अथ न ज्ञायते कस्यां दिशि क ईश्वरस्तदर्थमाह–

राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः।

गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्।।४ ।।

राजा नृपः पूर्वस्यां दिशि। कुमारो राजपुत्र आग्नेय्याम्। नेता सेनापतिर्दक्षिणस्याम्। दूतो गमागमिको नैर्ऋत्याम्। श्रेष्ठी पश्चिमायाम्। चरो गूढपुरुषो वायव्याम्। द्विजो ब्राह्मण

उत्तरस्याम्। गजाध्यक्षो हस्तिशालाध्यक्ष ऐशान्याम्। एते क्रमेण पूर्वाद्या ज्ञेयाः। तथा क्षत्रियाद्याश्चतुर्दिशाम्। पूर्वस्यां क्षत्रियाः। दक्षिणस्यां वैश्याः। पश्चिमायां शुद्राः। उत्तरस्यां ब्राह्मणाः।

अन्यदप्याह-

सर्वदिक्ष्वशुभाः दीप्ता विशेषेणाह्यशोभना।

पुरे सैन्येऽपसव्या च कष्टा सूर्योन्मुखी शिवा।।५।।

दीप्ता शिवा सर्वासु दिक्ष्वशुभा अनिष्टफला। अह्नि दिवसे विशेषेणातिशयेनाशोभना। पुरे नगरे सैन्ये सेनायां वा अपसव्या दक्षिणभागस्था सूर्योन्मुखी रव्यभिमुखी शिवा कष्टा कष्टफला। अशुभेत्यर्थः ।।

अथ रुतविशेषेण फलमाह-

याहीत्यग्निभयं शास्ति टाटेति मृतवेदिका।

धिग्धिग्दुष्कृतिमाचष्टे सज्वाला देशनाशिनी।।६।।

याहीति रुते शिवा अग्निभयं हुताशनयभीतिं शास्ति कथयति। टाटेति रुते मृतवेदिका। मृतं बन्ध्वादिकं वेदयति कथयति। केचिम्पृतिवेदिकेति पठन्ति। धिग्धिगिति रुते दुष्कृतिमतिकष्टमचिष्टे कथयति। सज्वाला ज्वालासंयुता देशनाशिनी देशान् नाशयति।

अत्रैव मतान्तरमाह-

नैव दारुणतामके सज्वालायाः प्रचक्षते।

अर्काद्यनवलत्तस्या वक्त्रं लालास्वभावतः।।७।।

अन्यप्रतिरुता याम्या सोद्वन्धमृतशंसिनी।

वारुण्यनुरुता सैव शंसते सलिले मृतम्।।८।।

याम्या दक्षिणदिग्भागस्थाऽन्यपतिरुताऽन्यया परया शिवया सैव कृतशब्दा सा शिवोद्वन्धमृत-शंसिनी, उद्वन्धनेन मृतं शंसति कथयति। सैव शिवा वारुणी पश्चिमदिक्स्थाऽन्ययाऽनुरुता सलिले जले मृतं बन्ध्वादिकं शंसते कथयति।।

अस्याः शब्दवशेन फलमाह-

अक्षोभः श्रवणं चेष्टं धनप्राप्तिः प्रियागमः।

क्षोभः प्रधानभेदश्च वाहनानां च सम्पदः।।९।।

फलमासप्तमादेतदग्राह्यं परतो रुतम्।

याम्यायां तद्विपर्यस्तं फलं षटपञ्चमादृते।।१०।।

या रोमाञ्चं मनुष्याणां शकृन्मूत्रं च वाजिनाम्।
रावात् त्रासं च जनयेत् सा शिवा न शिवप्रदा।।११।।

या शिवा रावाच्छब्दान्मनुष्याणां पुरुषाणां रोमाञ्चं रोमहर्षं जनयेदुत्पादयेत्। वाजिनामश्वानां शकृत् पुरीषमूत्रं जनयेत्। जनानां त्रासं भयं च। सा न शिवप्रदा शिवं श्रेयो न ददाति।।११।।

अथ शुभलक्षणमाह-

मौनं गता प्रतिरुते नरद्विरदवाजिभिः।
या शिवा सा शिवं सैन्ये पुरे वा सम्प्रयच्छति।।१२।।

या शिवा नरैर्मनुष्यैः। द्विरदैर्हस्तिभिः। वाजिभिरश्वैः। प्रतिरुते प्रातवाशते मौनं गता तुष्णीं करोति। सा सैन्यें सेनायाम्। पुरे नगरे शिवं श्रेयः। सम्प्रयच्छति ददाति।।१२।।

अन्यद्रुतलक्षणमाह-

भेभेति शिवा भयङ्करी भोभो व्यापदमादिशेच्च सा।
मृतिबन्धनिवेदिनी फिके हूहू चात्महिता शिवा स्वरे।।१३।।

शान्ता त्ववर्णात् परमारुवन्ती टाटामुदीर्णामिति वाश्यमाना।
टेटे च पूर्वं परतश्च थेथे तस्याः स्वतुष्टिप्रभवं रुतं तत्।।१४।।

उच्चैर्घोरं वर्णमुच्चार्य पूर्वं पश्चात् क्रोशेत् क्रोष्टुकस्यानुरुपम्।
या सा क्षेमं प्राह वित्तस्य चाप्तिं संयोगं वा प्रोषितेन प्रियेण।।१५।।

या शिवा उच्चैः कृत्वा पूर्वमादौ घोरं क्रूरं वर्णमक्षरमुच्चार्य पश्चादनन्तरात् क्रोष्टुकस्य श्रृगालस-नुरूपं सदृशं क्रोशेद् ब्रूयात्। एवंविधा सा क्षेमं प्राह कथयति। क्षेमं लब्धपालनं वित्तस्य चाप्तिं लब्धिम्। अथवा प्रोषितेन प्रियेण देशान्तरगतेन प्रियेण वल्लभेन संयोगं प्राह कथयति।।

१०. मृगचेष्टिताध्यायः

अथ मृगचेष्टितं व्यांख्यायते। तच्चाह-

सीमागता वन्यमृगा रुवन्तः स्थिता व्रजन्तोऽथ समापतन्तः।

सम्प्रत्यतीतैष्यभयानि दीप्ता कुर्वन्ति शून्यं परितो भ्रमन्तः।।१ ।।

वने भवा वन्याः। वन्यमृगाः। ऋष्यपृषतरुरुप्रभृतयः। सीमागता ग्रामसीमायां स्थिताः, तत्र च रुवन्तो वाश्यमानाः। ते च स्थितास्तत्रैव यदि तिष्ठन्ति, तदा सम्प्रति तस्मिन्नेव दिने भयमावेदयन्ति यदि च दीप्ताः। अथ तस्मात् सीमाप्रदेशाद् व्रजन्तो गच्छन्तस्तदातीतभयमतीतमतिक्रान्त भयमावेदयन्ति। अथ समापतन्तः समागच्छन्तो दीप्ताश्च रुवन्तः। तदैष्यभयानि, आगामिभयान्यावेदयन्ति। परितः समन्ततः पुरे भ्रमन्तः शून्यं निर्जनं पुरं कुर्वन्ति।।

अन्यदप्याह-

ते ग्राम्यसत्त्वैरनुवाश्यमाना भयाय रोधाय भवन्ति वन्यैः।

द्वाभ्यामपि प्रत्यनुवाशितास्ते वन्दिग्रहायै च मृगा रुवन्ति।।२ ।।

ते सीमागता मृगा दीप्ताः। ग्राम्यसत्त्वैर्ग्रामीणैः प्राणिभिरनुभवाश्यमाना भयाय पुरस्य भवन्ति। वन्यैः प्राणिभिरनुवाश्यमानाः पुरस्य रोधाय च भवन्ति। परैः पुरं रुध्यते। ते सीमागता द्वाभ्यामपि ग्राम्यैर्वन्यैश्च सत्त्वैः प्रत्यनुवाशिताः पश्चात् कृतशब्दा वन्दिग्रहायै च भवन्ति। वन्दिग्रहा हठहरणेन या स्त्री नीयते सा वन्दिग्रहा भीता। मृगा वन्दिग्रहायै च भवन्ति। तत्पुरं बलादेव शत्रुभिर्नीयत इत्यर्थः।।

अन्यदप्याह

वये सत्त्वे द्वारसंस्थे पुरस्य रोधो वाच्यः सम्प्रविष्टै विनाशः।

सूते मृत्युः स्याद्भयं संस्थिते च गेहं याते बन्धनं सम्प्रदिष्टम्।।३ ।।

वन्ये सत्त्वे वनजाते प्राणिनि द्वारसंस्थे पुरस्य नगरस्यैव रोधो वाच्यः। रोधः परैर्वेष्टनम्। पुरमध्ये सम्प्रविष्टे पुरस्यैव विनाशो वाच्यो वक्तव्यः। तस्मिन्नेव प्रसूते मृत्युर्मरणं स्याद् भवेत। संस्थिते मृते च भयं स्यात्। गेहं याते गृहं प्रविष्टे गृहस्वामिनो बन्धनं सम्प्रविष्टम्।।

११. गवेङ्गिताध्यायः

तदेवाह -

गावो दीनाः पार्थिवस्याशिवाय पादैर्भूमिं कुट्टयन्त्यश्च रोगान्।

मृत्युं कुर्वन्त्यश्रुपूर्णाग्रताक्ष्यः पत्युर्भीतास्तस्करानारुवन्त्यः।।१।।

गावो दीनां दैन्यं गता म्लानमुखाः पार्थिवस्य राज्ञोऽशिवाय अश्रेयसे भवन्ति। तथ भूमिमवनिं पादैः खुरैः कुट्टयन्त्यो विदारयन्त्यो रोगान् कुर्वन्ति। अश्रुपूर्णायताक्ष्यः, अश्रुपूर्णे आयते दीर्घे अक्षिणी यासां तास्तथाभूताः पत्युः स्वामिनो मृत्युं मरणं कुर्वन्ति। तथा भीताः सभया आरुवन्त्यः अतीव शब्दं कुर्वत्यः तस्करांश्चौरान् कुर्वन्ति।।

अन्यदप्याह-

अकारणे क्रोशति चेदनर्थो भयाय रात्रौ वृषभः शिवाय।

भृशं निरुद्धा यदि मक्षिकाभिस्तदाशु वृष्टिं सरमात्मजैर्वा।।२।।

यदकारणं निष्कारमेव क्रोशति वाशति, तदाऽनार्थो भवति। तस्य जलतृणादिकं कारणं तद्वर्जमकारणम्। रात्रौ निशि यदि वाशाति, तदा भयाय भवति। वृषभो दान्तो रात्रौ वाच्यमानः शिवाय श्रेयसे भवति। भृशमत्यर्थं यदि मक्षिकाभिर्निरुद्धा व्याप्ता, सरमात्मजैः श्वभिर्वा निरुद्धा व्याप्ता तदा आशु शीघ्रमेव वृष्टिं करोति।

अन्यदप्याह-

आगच्छन्त्यो वेश्मबम्भारवेण संसेवन्त्यो गोष्ठवृद्धयै गवां गाः।

आर्द्राङ्ग्यो वा हृष्टरोम्ण्यः प्रहृष्टा धन्या गावः स्युर्महिष्टष्योऽपि चैवम्।।३।।

वेश्म गृहमागच्छन्त्यो बम्भारवेण मधुरस्वरेण संयुक्त गा गावः संसेवन्त्यो निषेवन्त्यो गवां गोष्ठवृद्धयै गोष्ठसंवर्धनाय धन्याः प्रशस्ताः स्युर्भवन्ति। अर्थवशाद्विभक्तिलिङ्गवचनविपरिणामः। गीवृद्धिं कुर्वन्ति। केचिदागव्यूतेरिति पठन्ति। गव्यूतिः क्रोशद्वयम्। तस्माद बम्भारवेणेति पूर्ववद्योज्यम्। आर्द्रा-ङ्ग्यो वेति। आर्द्राणि जलेन क्लिन्नानि अङ्गानि अवयवानि यासाम्। हृष्टरोम्ण्यः सञ्जातपुलकाः। प्रहृष्टा हर्षसंयुक्ताः। एवंविद्याश्च गोष्ठवृद्धयै धन्याः महिष्योऽपि चैवम्। एवमनेन प्रकारेण- 'आगच्छन्त्यो वेश्मबम्भारवेण' इत्यादिकेन तथा–'दीनाः पार्थिवास्याशिवाय' इत्यादिर्केन शुभाशुभेन महिष्योऽपि स्युर्भवेयुरिति यद्गवामिङ्गितं तन्महिषीणामित्यर्थः।

१२. अश्वेङ्गिताध्यायः

तच्चाह-

उत्सर्गाश्र शुभदमासनात् परस्थ कामे च ज्वलनमतोऽधरं प्रशसतम्।

सर्वाङ्गज्वलनमवृद्विदं हवानां द्वे वर्षे दहनकणाश्च धूपनं वा।।१।।

उत्सर्गान्न शुभदमिति। हयानामश्वानामुत्सर्गादयं नियमो यत्रापवादो नास्ति। आसनात् परस्थम् आस्यते यस्मिन्नित्यासनं पर्याणस्थानम्। तस्मादपरस्थं पश्चिमभागे स्थितं ज्वलनं न शुभदमप्रशस्त्। वामे च वामभागे वामपार्श्वे तस्मादेवासनस्थानान्न शुभदम्। अतोऽस्मादपरं प्राग्भागे दक्षिण च प्रशस्त-मिष्टतरम्। अश्वानामुत्पातवशेन ज्वालारूपमवयवेषु दृश्यते तत् सर्वाङ्गज्वलनम्। तत् सर्वाङ्गानां समस्तावयवानां ज्वलनमवृद्धिद्म। अवृद्धिं विनाशं ददाति।

द्वे वर्षे दहनकणाश्च धूपनं चेति वेति। यस्य हयस्य द्वे वर्षे वर्षद्वयमविच्छिन्नं कृत्वा दहनकणा अग्निविस्फुलिङ्गा धूपनं धूमो वा दृश्यते तदा तस्यावृद्धिदमेव।

अथान्येष्वप्याह-

अन्तः पुरं नाशमुपैति मेढ्रे कोशः क्षयं यात्युदरे प्रदीप्ते।

पायौ च पुच्छे च पराजयः स्याद्वक्त्रोत्तमाङ्गज्वलने जयश्च।।२।।

अश्वानां मेढ्रे लिङ्गे प्रदीप्ते राज्ञोऽन्तः पुरं नाशमुपैत्ति विनाशं प्राप्नोति। उदरे जठरे प्रदीप्ते ज्वलिते कोशो गञ्जः क्षयं नाशं याति। पायावुपस्थे पुच्छे लाङ्गूले च प्रदीप्ते पराजयः स्याद् भवेत्। वक्त्रं मुखम्। उत्तमाङ्गं शिरःअ वक्त्रोत्तमाङ्गज्वलने जयश्च भवति।

अथान्येष्वङ्गेष्वप्याह-

स्कन्धासनांसज्वलनं जयाय बन्धाय पादज्वलनं प्रदिष्टम्।

ललाटवक्षोऽक्षिभुजे च धूमः पराभवाय ज्वलनं जयाय।। ३।।

नासापुटप्रोथशिरोऽश्रुपातनेत्रे च रात्रौ ज्वलनं जयाय।

पलाशाताम्रासितकर्बुराणां नित्यं शुकाभस्य सितस्य चेष्टम्।।४।।

नासापुटौ नासारन्ध्रौ। प्रोथो नासामध्यभागः। शिरो मूर्धा। अश्रुपातोऽश्रुणः पातो यत्र। गण्डाधोभागः। नेत्रे चक्षुषी। एतेषामन्यतमस्य रात्रौ निशि ज्वलनं जयाय भवति। पलाशः पलाशवर्णः। ताम्रो लोहितवर्णा। असितः कृष्णः। कूर्बरः शुक्लकुष्णवर्णो व्यामिश्रः। कपोतवर्ण

इत्यर्थः। एषां वर्णानां तथा तस्य शुकवर्णस्य सितस्य श्वेतवर्णष्य चैतेषामङ्गानामेकतमे द्वयोर्बहुषु वा ज्वलनं नित्यं सर्वकालं दिने निशायां चेष्टं शोभनं भवति।

अन्यदपि चेष्टितमाह-

प्रद्वेषो यवसाम्भसां प्रद्यतनं स्वेदो निर्मित्ताद्विना

कम्पो वा वदनाच्च रक्तपतन धूमस्य वा सम्भवः।

अस्वप्नश्च विरोधिनां निशि दिवा निद्रालसध्यानता

सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम्।।५।।

आरोहणमन्यवाजिनां पर्याणादियुतस्य वाजिनः।

उपवाह्यतुरङ्गमस्य वा कल्पस्यैव विपन्नशोभना।।६।।

वाजिनोऽश्वस्य पर्याणादियुतस्य पर्याणसंयुक्तस्य। आदिग्रहणात पुरुषसहितस्या अन्यवाजि-नामन्याश्वानामारोहणम्। पर्याणादियु-तश्चोन्योऽश्व आरोहति तनी शोभनम्। उपवाह्यतुरङ्गगमस्य चेति। यस्मिन्नारुह्य गमनं प्रत्युपवाह्यते तस्योपवाह्यतुरङ्गमस्याश्वस्य कल्पस्यारोगस्य विपन्नशोधभना नेष्टेति।

अधुना ह्रेषितलक्षणमाह-

क्रौञ्चवद्रिपुवधाय ह्रेषितं ग्रीवया त्वचलया च सोन्मुखम्।

स्निग्धमुच्चमनुनादि ह्रष्टवद्ग्रासरुद्धवर्दनैश्च वाजिभिः।।७।।

क्रौञ्चः पक्षी। यस्य ह्रेषितं शब्दितं क्रौञ्चपक्षिसदृशं तद्रिपुबधाय शत्रुविनाशाय। तथा ग्रीवया कन्धरया त्वचलया स्थिरया च सोन्मुखं सह ऊर्ध्वेन मुखेन वर्तत इति सोन्मुखम्, तदपि रिपुबधायैव। स्निग्धं मधुरमुच्चमुच्चैः कृत्वा स्पष्टतरम्। अनुनादि घण्टाशब्दवदनुनदति पश्चाच्छब्दं करोति। हष्टवत् परितोषयुक्तैर्ग्रासरुद्धवदनैः। ग्रासेन कवलेन रुद्धं वदनं मुखं येषां तैस्तथाभूतैस्तद्ध्रेषितं रिपुवधायैव भवति।

अन्यदप्याह –

पूर्णपात्रदधिविप्रदेवतागन्धपुष्पफलकाञ्चनादि वा।

द्रव्यमिष्टमथवा परं भवेद्ध्रेषतां यदि समीपतो जयः।।८।।

भक्ष्यपानखलिनाभिनन्दिनः पत्युरौपकिनन्दिनोऽ थवा।

सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः।।९।।

भक्ष्यं भक्षणीयं द्रव्यम्। पानं जलम्। खलिनं कविका। एतानि यद्यभिनन्दयन्ति, अथवा पत्युर्भर्तुरौपयिकं यदुपयुज्यते तदभिनन्दयन्ति। अथवा सव्यपार्श्वे आत्मीयदक्षिणपार्श्वे गतदृष्टयो वीक्ष्यमाणाः। एवंविधास्तुरङ्गमा वाञ्छितार्थफलदा वाञ्छितस्याभीष्टस्यार्थस्य फलं ददति।

अधुनाशुभचेष्टितमाह-

वामैश्च पादैरभिताडयन्तो महीं प्रवासाय भवन्ति भर्तुः।
सन्ध्यासु दीप्तामवलोकयन्तो ह्रेषन्ति चेद् बन्धपराजयाय।।१०।।

अतीव ह्रेषन्ति किरन्ति वालान् निद्रारताश्च प्रवदन्ति यात्राम्।
रोमत्यजो दीनखरस्वराश्च पांशून् ग्रसन्तश्च भयाय दृष्टाः।।११।।

समुद्भवद्दक्षिणपार्श्वशायिनः पदं समुत्क्षिप्य च दक्षिण स्थिताः।
जयाय शेषेष्वपि वाहनेष्विदं फलं यथासम्भवमादिशेद् बुधः।।१२।।

आरोहति क्षितिपतौ विनयोपपन्नौ यात्रानुगोऽन्यतुरगं प्रतिह्रेषते च।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं योऽश्वः स भतर्णुरचिरात प्रचिनोति लक्ष्मीम्।।१३।।

क्षितिपतौ राज्ञि राजनि वाऽऽरोहित उत्कषति योऽश्वस्तुरगो विनयोपपन्नो नीतिसंयुक्तो भवति, तथा यात्रानुगो यात्रादिगभिमुखः। यां दिशं गच्छति राजा तस्यामेव गच्छति। अन्यतुरगं प्रतिह्रेषते च। अन्यस्मिन् तरुगे ह्रेषिते शब्दं कुर्वति सति प्रतिह्रेषितं करोति। अथवा वक्त्रेण मुखेनात्मपार्श्वे दक्षिणं सव्यं स्पृशति, स भुर्तुः प्रभोरचिराच्छीध्रमेव लक्ष्मीं श्रियं प्रचिनोति वृद्धिं नयति।।

अथाशुभनिमित्तान्याह-

मुहुर्मुहुर्मूत्रशकृत् करोति न ताडयमानोऽप्यनुलोमयायी।
अकार्यभीतोऽश्रुविलोचनश्च शिवं न भर्तुस्तुरगोऽभिद्यते।।१४।।

उक्तमिदं हयचेष्टितमत ऊर्ध्वं दन्तिनां प्रवक्ष्यामि।
तेषां तु दन्तकल्पनभङ्गम्लानादिचेष्टाभिः।।१५।।

इदं हयानामश्वानां चेष्टितं कथितम्, अतोऽस्मादूर्ध्वमनन्तरं दन्तिनां गजानां सम्प्रवक्ष्यामि कथयिष्यामि। तेषां तु दन्तकल्पनेन दन्तभङ्गेनास्फोटनेन दन्तानां म्लानत्वेन वैकल्येन चेष्टयां चेष्टितेन। आदिग्रहणादन्यैः पार्थिवोपकरणादिभिः फलानि भवन्ति।।

१३. हस्तिचेष्टिताध्यायः

तत्रादावेव दन्तकल्पनविधानमाह-

दन्तस्य मूलपरिधिं द्विरायतं प्रोह्य कल्पयेच्छेषम्।

अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित्।।१।।

मूले परिधिर्मूलपरिधिः। परिधिः पारिमण्डल्यम्। दन्तस्य रदस्य मूले यः परिधिः परिणाहस्तं द्विरायतं द्वौ वारौ द्विगुणमायतं दीर्घं प्रोह्य त्यत्त्वा शेषं कल्पयेत छिन्द्यात्। एतदुक्तं भवति- दन्तमूलात् पारिमण्डल्येन सूत्रेण मित्वा तत् सूत्रं द्विगुणं कृत्वा यद्भवति तावत् प्रमाणं दन्तमूलाद् दैर्ध्यं त्यक्तवा शेषं कल्पयेत्। अधिकमनूपचराणामिति। अनूपो बहूदको देशः। अनूपचराणां हस्तिनां दन्तमूलपरिधिं द्विरायताधिकं प्रोह्य शेषं कल्पयेत्। गिरिचराणां पर्वते सदैव ये चरन्ति तेषां न्यूनं किञ्चिद् दन्तमूलपरिधिं द्विरायतं प्रोह्य शेषं कल्पयेत्।

अथ परिकल्पितस्य दन्तस्य लक्षणमाह-

श्रीवत्सवर्धमानच्छत्रध्वजचामरानुरूपेषु।

छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि।।२।।

श्रीवत्सो वर्धमानः। एतौ चिह्नविशेषौ। छत्रमातपत्रम्। ध्वजः प्रसिद्धः। चामरं वालव्यजनम्। एषामनुरूपेण सदृशेषु चिह्नेषु छेदे दृष्टेषु अवलोकितेष्वारोग्यमरोगित्वं विजयो धनवृद्धिः सौख्यमेतानि भवन्ति।।

अन्यदप्याह-

प्रहरणसदृशेषु जयो नन्द्यावर्ते प्रनष्टदेशाप्तिः।

लोष्टे तु लब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः।।३।।

प्रहरणं खड्गादि। प्रहरणसदृशेषु तदाकारेषु छेदे दृष्टेषु जयो भवति। नन्द्यावर्तश्चिह्नविशेषः। नद्यावर्तसदृशच्छेदे दृष्टे प्रनष्टस्यापहृतस्य देशस्याप्तिर्लाभो भवति। लोष्टे लोष्टसदृशे तु मृत्खण्डा-कृतौ लब्धपूर्वस्य देशस्य सम्प्राप्तिर्लाभो भवति। पूर्व लब्धोलब्धपूर्वः। नाममात्रेण लब्धोन हस्तीभूतस्तस्य सम्प्राप्तिर्लाभो भवति ।

अन्यदप्याह-

स्त्रीरूपेऽश्वविनाशो भृङ्गारेऽभयुत्थिते सुतोत्पत्तिः।

कुम्भेन निधिप्राप्तिर्यात्रविध्नश्च दण्डेन।।४।।

स्त्रीरूपे योषिदाकृतौ छेदे दृष्टेऽश्वानां तुरगाणां विनाशः क्षयो भवति। भृङ्गारो वार्धानी। भृङ्गाराकृताभ्युत्थिते उत्पन्ने सुतस्य पुत्रस्योत्पत्तिः सम्भवो भवति। कुम्भेन घटसदृशेन निधिप्राप्ति-निधिलाभो भवति। दण्डेन दण्डाकारेण यात्राविघ्नो गमननिषेधो भवति।।४।।

अन्यदप्याह-

कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुवशित्वम्।

गृध्रोलूकध्यांक्षश्येनाकारेषु जनमरकः।।५।।

कृकलासः प्राणिविशेषः। कपिर्वानरः। भुजङ्गः सर्पः। एतेषु छेदे दृष्टेषु असुभिक्षं व्याधयः पीडा रिपुवशित्वं शत्रूणां विधेयत्वमिति। गृध्रः, उलूकः। एतौ प्रसिद्धौ पक्षिणौ। ध्वांक्षः काकः। श्येनो वाजिकः। एषामाकारेषु सदृशेषु छेदे दृष्टेषु जनमरको जनानां मकरो भवति।।

अन्यदप्याह-

पाशेऽथवा कबन्धे नृपमुत्युर्जनविपत् स्त्रुते रक्ते।

कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति।।६।।

शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः।

गलनम्लानफलानि च दन्तस्य समानि भङ्गेन।।७।।

शुक्लः। समः सर्वभागेषु तुल्यः। सुगन्धिः शोभनगन्धिः। स्निग्धः सस्नेहः। एवं विधश्छेदः शुभावहः शुभं करोति। उक्तं च-

पार्थिवापकरणोपमं यदा चिह्नमुद्वहति कल्पिते रदे।

श्रीजयार्थबलवृद्धयस्तदा स्निग्धशुक्लरुचिराश्च शोभनाः।।

गलनम्लानफलानीति। गलनं स्थानस्यैव विशरणं स्त्रावो वा। म्लानं म्लानता वैवर्ण्यम्। एतेषां यानि फलानि तानि दन्तस्य भङ्गेन स्फोटनेन समानि। यादृशं दन्तभङ्गयलं वक्ष्यमाणं तादृशमपि गलनम्लान-फलम्।

अन्यच्छुभाशुभमाह-

मूलमध्यदशनाग्रसंस्थितां देवदैत्यमनुजाः क्रमात् ततः।

स्फीतमध्यपरिपेलवं फलं शीघ्रमध्यचिरकालसम्भवम्।।८।।

दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम्।

वामतः सुतपुरोहितेभयान् हन्ति साटविकदारनायकान्।।९।।

आदिशेदुभयभङ्गदर्शनात् पार्थिवस्य सकलं कुलक्षयम्।

सौम्यलग्नतिथिभादिभिः शुभं वर्धतेऽशुभमतोऽन्यथा वदेत्।।१०।।

क्षीरमृष्टफलपुष्पपादपेष्वापगातटविघट्टितेन वा।

वाममध्यरदभङ्गखण्डने शत्रुनाशकृतदतोऽन्यथा परम्।।११।।

स्खलितगतिकस्मात् त्रस्तकर्णोऽतिदीनः श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम्।

द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो भयकृदहितभक्षी नैकशोऽसृक्शकृत्कृत्।।१२।।

वल्मीकस्थाणुगुल्मक्षुपतरुमथनस्वेच्छया हृष्टदृष्टि-

र्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नम्य चोच्चः।

कक्ष्यासन्नहकाले जनयति च मुहुः शीकरं बृंहितं वा

तत्काले वा मदाप्तिर्जयकृदथ रदं वेष्टयन् दक्षिणं च।।१३।।

वल्मीकस्थाणुगुल्मेति। एवंविधो गजो जयकृत, राज्ञो जयं करोति। यदि वल्मीककृतं मृत्स्तूपं मथ्नाति। स्थाणुर्निः शेषशाखाच्छिन्नो वृक्षः शृष्कवृक्षो वा। गुल्म एकमूलः शाखासमूहः। क्षुपं शष्पम्। तरुर्वृक्षः। एतेषामन्यतमं त्यदि स्वेच्छया आत्मेच्छया मथ्नाति। तथा हृष्टदृष्टिः, हृष्टा दृष्टिर्यस्य सः। यायाद्यात्रानुलोममिति। त्वरितपदगतिः शीघ्रगामी वक्त्रं मुखमुच्चैरुन्नाम्योत्क्षिप्य यात्रानुलोमं यात्रादिशं यायाद् गच्छेत्। तथा कक्ष्यासन्नहकाले मध्यबन्धनप्रतिवेलायां जनयत्युत्पादयति मुहुर्मुहुः पुनः पुनः शीकरं वक्रोदककणान् मुञ्चति। बृंहतिं घनगर्जितं वा करोति। तत्काले वा मदाप्तिर्मदप्रादुर्भावः। तथा रदं दन्तं दक्षिणं वेष्टयन् करेणालम्बयन् इति।।

अन्यदपि चेष्टितमाह-

प्रवेशनं वारिणि वारणस्य ग्राहेण नाशाय भवेन्नृपस्य।

ग्राहं गृहीत्वोत्तरणं नृपस्य तोयात् स्थलं वृत्तिकरं नृभर्तुः।।१४।।

वारणस्य गजस्य ग्राहेण जलप्राणिना वारिणि जलमध्ये प्रवेशनं नृपस्य राज्ञो नाशाय भवेत् स्यात्। तथा द्विपस्य हस्तिनो ग्राहं जलप्राणिनं नीत्वाऽऽक्रम्य तोयाद जलात् स्थल उत्तरणं नृभर्तू राज्ञो वृद्धिकरं भवतीति।

१४. पुरुषलक्षणाध्यायः

उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्वमनूकमादौ।

क्षेत्रं मृजां च विधिवत् कुशलोऽवलोक्य सामुद्रविद्वदति यातमनागतं वा।।१।।

उन्मानं च मानं च गतिश्च संहतिश्च सारश्च वर्णश्च स्नेहश्च स्वरं च प्रकृतिश्च सत्त्वं च तदुन्मानमा-नगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्त्वम्। न केवलमुन्मानमानाद्यं यावदनूकं क्षेत्रं मृजां च। आदौ प्रथमं पुरुषलक्षणं सामुद्रम। तद्वे जानातीति सामुद्रवित्, समुद्रे प्रोक्तं पुरुषलक्षणं सामुद्रम। तद्वे जानातीति सामुद्रवित्, वदति कथयतीति।यातमतिक्रान्त-मिष्टानिष्टफलम्। न केवलं यावदनागतमेष्यद्वेति। अत्र केचिन्मन्यन्ते। प्रकृतिपर्यायं सत्त्वमाचार्येण व्याख्यातम्। एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् इति। तस्मात् सत्त्वशब्दमत्रातिरिच्यते। जातिरिच्यंत इत्युच्यते। सत्त्वं नाम चेतोधर्मः, यस्मिन् सति न कुतश्चिद्भयमुत्पद्यते, न कस्यामप्यवस्थायां विषादः समुपजायते, तत्समाचक्षते कुशलाः-

तथा चाचार्येणानन्तरमेव पञ्चपुरुषलक्षणे सत्त्वमन्यदेव दर्शितम्-तद्धातुमहाभूतप्रकृतिद्युतिवर्ण-सत्त्वरूपाद्यैः, इति, सत्त्वमहीनं सूर्यात् इति। तथा- भौमात् सत्त्वं गुरुता बुधात् इति यस्मादुक्तं तस्मात् सत्त्वमिति नातिरिच्यते। अपरे अन्यथा पठन्ति-प्रकृतयश्च ततो ह्यनूकम् इति। प्रकृतयश्च न जायन्ते। यतोऽवलोक्यास्याः क्रियाया उन्मानादिप्रकृतिपर्यन्तं सामासिकं पदं कर्म। कर्मत्वे च प्रकृतिं प्रकृतीरिति वा भवितव्यम्। सत्त्वमित्येतच्च न संगृहीतं स्यादिति स्पष्टीक्रियते उन्मानिमिति। ऊर्ध्वमंगुलादिकं मानमुन्मानम्। तथा कात्यायानः-**बृ.सं., पृ-२०१**

महीस्वभावः शुभपुष्पगन्धः इत्यादि एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् इति। सत्त्वं पञ्चपुरुषलक्षणोक्तं प्राक् प्रतिपादितमेव। अनूकमित्येतज्जन्मान्तरा-दागतिरनूकाख्या।

अनूकं प्रकृतितो विशेषेणैव गम्यते, प्रकृतिश्चानन्तरं प्रदर्शिता।। क्षेत्रमिति।

अत्राचार्याः पदात् प्रभृति केशान्तं यावल्लक्षणानि वक्ष्यन्ति। तत्रादावेव पादयो-र्लक्षणमाह-

र्लक्षणमाह-

अस्वेदनौ मृदुतलौ कमलोदराभौ श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी।

उष्णौ शिराविरहितौ सुनिगूढगुल्फौ कूर्मोन्नतौ च चरणौ मनुजेश्वरस्य।।२।।

एवंविधौ चरणौ पादौ मनुजेश्वरस्य राज्ञः। कीदृशौ? अस्वेदनौ स्वेदवर्जितौ। मृदुतलौ मृदुनी मार्दवयुक्ते तले ययोः। कमलोदराभौ कमलं पद्मं तस्योदरं तत्सदृशी आभा कान्तिर्ययोः। श्लिष्टाङ्गुली घनाङ्गलियुक्तौ। रुचिरताम्रनखौ रुचिरास्तेजस्विनस्ताम्रवर्णा लोहिता नखाश्च ययोः। केचित् चिरपार्श्वनखाविति पठन्ति। रुचिरौ पार्श्वौ ययोः। सुपार्ष्णी शोभनपार्ष्णी। पार्ष्णिशब्देन पश्चात्पादभाग उच्यते। उष्णावुष्णयुक्तौ। शिराविरहितौ शिराभिर्वर्जितौ। सुनिगूढगुल्फौ निगूढौ निमग्नावनुल्बणौ गुल्फौ ययोः। कूर्मोन्नतौ कूर्मपृष्ठाकारौ। तथा भूतौ चरणौ मनुजेश्वरस्य। मनुजा मनुष्यास्तेषामीश्वरः प्रभुः। तथा च समुद्रः-

अथात्रैवाशुभलक्षणान्याह-

शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ

संशुष्कौ विरलाङ्गुली च चरणौ दारिध्रदुःखप्रदौ।

मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छेददौ

ब्रह्मन्धौ परिपक्कमृद्धुतितलौ पीतावगभ्यारतौ।।३।।

प्रविरलतनुरोमवृत्तजङ्घाद्विरदकरप्रतिमैर्वरोरुभिश्च।

उपचितसमजानवश्च भूपा धनरहिताः श्वश्रृगालतुल्यजङ्घः।।४।।

रोमैकैकं कूपके पार्थिवानां द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम्।

त्र्याद्यैर्निः स्त्रा मानवा दुःखभाजः केशाश्चैवं निन्दिताः पूजिताश्च।।५।।

रोमशाभिस्तु जङ्घाभिर्दुः खदारिद्रयभागिनः।

एकरोमा भवेद्राजा द्विरोमा च महायशाः।।

त्रिरोमा बहुरोमा च नरो भाग्यविवर्जितः।

अथ जानुलक्षणमाह-

निर्मांसजानुर्म्रियते प्रवासे सौभाग्यमल्पैर्विकटैर्दरिद्रा ः।

स्त्रीनिर्जिताश्चैव भवन्ति निम्नै राज्यं समांसैश्च महभ्दिरायुः।।६।।

लिङ्गेऽल्पे धनवानपत्यरहितः स्थूलेऽपि हीनो घनै -

र्मेढ्रे वामनते सुतार्थरहितो वक्रोऽन्यथा पुत्रवान्।

दारिद्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते

स्थूलग्रन्थियुक्ते सुखी मृदु करोऽत्यन्तं प्रमेहादिभिः।।७।।

अल्पे लिङ्गे मेढ्रे धनवान् वित्तवान् भवति। अपत्यरहितश्च पुत्रवर्जितः, अतिस्थूले लिङ्गे धनैर्हीनो दरिद्रो भवति। मेढ्रे लिङ्गे वामनते वामभागविनते सूतैः पुत्रैरर्थैर्धनै रहितो वर्जितः। अन्यथा वक्रे दक्षिणविनते पुत्रवान् भवति। अधोभागे विनते लिङ्गदारिद्रयं निर्धनत्वं भवति। शिरासन्तते शिराबहु-लेऽल्पतनयः स्वल्पपुत्रः। स्थूलेन ग्रन्थिना युते सुखी सुखितो भवति। मृदुलिङ्गं मनुष्यं प्रमेहादिभिः कमलामूत्रकृच्छ्रगृह्यरोगैरन्तं करोति। म्रियत इत्यर्थः।।

अत्रैवान्यलक्षणमाह-

कोशनिगूढैर्भूपा दीर्घौर्भग्नैश्च वित्तपरिहीनाः।
ऋजुवृत्तशेफसो लघुशिरालशिश्नाश्च धनवन्तः।।८।।

जलमृत्युरेकवृषणो विषमैः स्त्रीचञ्चलः समैः क्षितिपः।
ह्रस्वायुश्चोद्बद्धैः प्रलम्बवृषणस्य शतमायुः।।९।।

रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च।
सुखिनः सशब्दमूत्रा निःस्वा निःशब्दधारश्च।।१०।।

द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्त्तवलितमूत्राभिः।
पृथिवीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः।।११।।

एकैव मूत्रधारा वलिता रूपप्रदा न सुतदात्री।
स्निग्धोन्नतसममणयो धनवनितारत्नभोक्तारः।।१२।।

मणिभिश्चमध्यानिम्नैः कन्यापितरो भवन्ति निःस्वाश्च।
बहुपशुभाजो मध्यन्नतैश्च नात्युल्बणैर्धनिनः।।१३।।

रक्तैराढया मणिभिरिति। लिङ्गस्याग्रं मणिशब्देनोच्यते। रक्तैर्लोहितैर्मणिभिराढया ईश्वरा भवन्ति। पाण्डुरैः शुक्लाभैर्मलिनैश्च कृष्णवर्णैर्निर्द्रव्या निर्धना भवन्ति। सशब्दं शब्दसहितं मूत्रं येषां ते सुखिनः। निःशब्दाः शब्दरहिता मूत्रधारा येषां ते निःस्वा निर्धना भवन्ति।

द्वित्रिचतुर्धाराभिरिति। द्वाभ्यां मूत्रधाराभ्यां तिसृभिर्वा चतसृभिर्मूत्रधाराभिः प्रदक्षिणावर्त्तवलित-मूत्राभिः प्रदक्षिणेनावर्त्तेन वलितं वेष्टितं मूत्रं यासां ताभिः पृथिवीपतयो ज्ञेया राजानो वेदितव्याः। विकीर्णं विक्षिप्तं मूत्रं येषां ते विकीर्णमूत्रा धनहीना निर्धना भवन्ति।

अधुना बस्तिशुक्रमैथुनानां लक्षणमाह-

परिशुष्कवस्तिशीर्षैर्धनरहिता दुर्भगाश्च विज्ञेयाः।

कुसुमसमगन्धशुक्रा विज्ञातव्या महीपालाः।।१४।।

मधुगन्धे बहुवित्ता मत्स्यसगन्धे बहून्यपत्यानि।

तनुशुक्रः स्त्रीजनको मांसगन्धो महाभोगी।।१५।।

मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्र :।

शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाल्पायुः।।१६।।

निःस्वोऽतिस्थूलस्फिक् समांसलस्फिक् सुखान्वितो भवति।

व्याघ्रान्तोऽध्यर्धस्फिग्मण्डूकस्फिग्नराधिपतिः।।१७।।

अतिस्थूलौ स्फिजौ यस्य स निःस्वो निर्धनो भवति। समांसलौ मांससंयुक्तौ स्फिजौ यस्य स सुखान्वितः सुखयुक्तो भवति। योऽध्यर्धस्फिक् स व्याघ्रान्तः। व्याघ्रः प्राणी तं मारयति। मण्डूको भेकस्तत्सदृशौ स्फिजौ यस्य च नराधिपती राजा भवति। तथा च-

अथ कटिजलठरलक्षणमाह-

सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः।

समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः।।१८।।

सिंहसदृशी कटिर्यस्य स मनुजेन्द्रो राजा भवति। कपिर्वानरः। करभ उष्ट्रः। कपिकरभसदृशी कटिर्यस्य स धनैर्वित्तैः परित्यक्तो वर्जितः। समजठरास्तुल्योदरा न निम्नं नोन्नतं जठरं येषां ते भोगयुता भोगिनः। घटः कुम्भः पिठरो भाण्डविशेषः , तन्निभमुदरं येषां ते निःस्वा निर्धनाः। तथा च -

अथ पार्श्वकुक्षोदरलक्षणमाह-

अविकलपार्श्वा धनिनो निम्नैर्वक्रकैश्च भोगसन्त्यक्ताः।

समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः।।१९।।

उन्नतकुक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकुक्षाः।

सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव।।२०।।

परिमण्डलोन्नताभिर्विस्तीर्णाभिश्र नाभिभिः सुखिनः।

अल्पा त्वदृश्यनिन्मा नाभिः ल्केशावहा भवति।।२१।।

वलिमध्यगता विषमा शूलाद्वाधां करोति नैःस्व्यं च।

शाठ्यं वामावर्त्ता करोति मेघां प्रदक्षिणतः।।२२।।

पार्श्वायाता चिरायुषमुपरिष्टाश्चेश्वरं गवाढ्यमधः।

शतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते।।२३।।

शस्त्रान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथासंख्यम्।

एकद्वित्रिचतुर्भिर्वलिभिर्विन्द्यान्नृपं त्ववलिम्।।२४।।

विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः।

ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव।।२५।।

मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः।

विपरीतैर्निर्द्रव्याःसुखपरिहीनाः परप्रेष्याः।।२६।।

कटेरुपरि चतुरङ्गलो भागः पार्श्वशब्दवाच्यः। पार्श्वैर्मांसलैर्धनैः। मृदुभिः कोमलैः। प्रदक्षिणा-वर्तरोभिः प्रदक्षिणावर्तेन रोमाणि यानि तथाभूतैर्भूपा राजानो भवन्ति। विपरीतैरमांसलै रूक्षैर्वामावर्तरोम-भिर्निद्रव्यो निर्धनाः सुखैः परिहीना रहिताः परेषां प्रेष्याः कर्मकराश्च भवन्ति।

अथ चूचुकानां लक्षणमाह-

सुभगा भवन्त्यनुद्वद्धचूचुका निर्धना विषमदीर्घैः।

पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः सुखिनः।।२७।।

चूचुकं स्तनाग्रम्। अनुद्धद्धैरनूर्ध्वप्रेक्षकैश्चूचुकैः सुभगा भवन्ति। विषमैरतुल्यैर्दीर्घैश्च चूचुकैर्निर्धना दरिद्रा भवन्ति। पीनैः कठिनैरुपचितैः समांसलैर्निमग्नैरनुद्वद्धैश्चूचुकैः क्षितिपतयो राजानो भवन्ति, ते च सुखिनः सुखभागः।

अथ हृदयलक्षणमाह-

हृदयं समुन्नतं पृथु न वेपनं मासलं च नृपतीनाम्।
अधनानां विपरीतं खररोमचितं शिरालं च।।२८।।

हृदयं समुन्नतमुच्चं पृथु विस्तीर्णं न वेपनमकम्पनं मांसलं च नृपतीनां राज्ञां भवति। विपरीतं निम्नमविस्तीर्णं कम्पनममांसलमधनानां दरिद्राणां भवति। तथा खररोमचितं रूक्षस्थूलरोमसंयुक्तं शिरालं शिरासन्ततं च अधनानामेव तथा च-

अथ वक्षोलक्षणमाह-

समवक्षसोऽर्थवन्तः पीनैः शूरा ह्यकिञ्चनास्तनुभिः।
विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च।।२९।।

समं न निम्नं नात्युच्चं वक्ष उरो येषां ते अर्थवन्तो धनिनः। पीनैर्मांसलैः कठिनैश्च वक्षोभिः शूरा भवन्ति। तनुभिरल्पमांसैर्हि, अकिञ्चना अकिञ्चित्कराः पुरुषकारहीनाः। येषां वक्षो विषममतुल्यं ते निःस्वा निर्धनाश्च शस्त्रनिधनाश्च शस्त्रमृत्यवो भवन्ति।

अथ जत्रुलक्षणमाह-

विषमैर्विषमो जत्रुभिरर्थविहीनोऽस्थिसन्धिपरिणद्धैः।
उन्नतजत्रुर्भोगी निम्नैर्निःस्वोऽर्थवान् पीनैः।।३०।।

जत्रुः कुक्षयोः सन्धिः। विषमैरतुल्यैर्जत्रुभिर्विषमः क्रूरो भवति। अस्थिसन्धिपरिणद्धैः, अस्थ्नां सन्धयोऽस्थिसन्धयः, तैः परिणर्द्धैर्बद्धैरर्थविहीनो निर्धनो भवति। उन्नत उच्चो जत्रुर्यस्य स भोगी भोगवान् भवति। निम्नैर्जत्रुभिर्निः स्वो दरिद्रो भवति। पीनैः पीवरैर्जत्रुभिरर्थवान् धनी भवति।

अथ ग्रीवापृष्ठलक्षणमाह-

चिपिटग्रीवो निःस्वः शुष्का सशिरा च यस्य वा ग्रीवा।
महिषग्रीवः शूरः शस्त्रान्तो वृषसमग्रीवः।।३१।।
कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षनो भवति।
पृष्ठमग्रमरोमशमर्थवताशुभदमतोऽन्यत्।।३२।।

अस्वेदनपीनोन्नतसुगन्धसमरोमसङ्कुलाः कक्षा।
विज्ञातव्या धनिनामतोऽन्यथार्थैर्विहीनानाम्।।३३।।

निर्मांसो रोमचितौ भग्नावल्पौ च निर्धनस्यांसौ।

विपुलावव्युच्छिन्नौ सुश्लिष्टौ सौखवीर्यवताम्।। ३४।।

अंसौ स्कन्धौ निर्मांसौ मांसरहितौ रोमचितौ रोमव्याप्तौ भग्नौ स्फुटितावल्पौ निर्धनस्य दरिद्रस्य विपुलावव्युच्छिन्नावभग्नौ सुश्लिष्टौ सुसंलग्नौ सौख्यवीर्यवतां सुखिनां बलिनां च भवतः। तथा च-

अथ बाहुलक्षणमाह-

करिकरसदृशौ वृत्तावाजान्ववलम्बिनौ समौ पीनौ।

बाहू पृथिवीशानामधनानां रोमशौ ह्रस्वौ।।३५।।

बाहू भुजौ करिकरसदृशौ गजहस्ततुल्यौ वृत्तो परिवर्तुलौ। आजान्ववलम्बिनौ जानु सम्प्रापिणौ समौ तुल्यौ पीनौ समांसलौ पृथिवीशानां राज्ञां विज्ञातव्यौ। रोमशौ रोमयुक्तौ ह्रस्वावदीर्घावधनानां निर्धनानां विज्ञेयौ। तथा च-

इदानीं हस्तलक्षणान्याह-

हस्ताङ्गुलयो दीर्घाश्चिरायुषामलविताश्च सुभगानाम्।

मेधाविनां च सूक्ष्माश्चिपिटाः परकर्मनिरतानाम्।।३६।।

स्थूलाभिर्धनरहिता बहिर्नताभिश्च शस्त्रनिर्याणाः।

कपिसदृशकरा धनिनो व्याघ्रोप्रमाणयः पापाः।।३७।।

मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिभूपाः।

हीनैर्हस्तच्छेदः श्लथैः सशब्दैश्च निर्द्रव्याः।।३८।।

मणिबन्धनशब्देन हस्तमूलमुच्यते। निगूढैरनुल्बणैर्मणिबन्धनैदृढैरशिथिलैः सुश्लिष्टसन्धिभिः सुसंलग्नमर्मभिर्भूपा राजानो भवन्ति। हीनैर्मलिबन्धैर्हस्तच्छेदो भवति। श्लथैः शिथिलैः सशब्दैः शब्द-युक्तैर्निर्द्रव्या निर्धना भवन्ति।

अन्यदप्याह-

विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाक्षामैः।

पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः।।३९, ४०।।

नरा मनुष्या निम्नेन करतलेन पितृवित्तेन पैतृकेण धनेन विहीना रहिता भवन्ति, संवृतनिम्नैः सधना भवन्ति। पीतैर्हस्ततलैरगम्यानां वनितानां स्त्रीणामभिगामिनो गमनशीला भवन्ति। रूक्षैर्हस्त-तलैर्निर्धना दरिद्राः।।

अन्यदप्याह-

तुषसदृशनखाः ल्कीबाश्चिपिटैः स्फुटितैश्च वित्तसन्त्यक्ता।

कुनखविवर्णैः परतर्कुकाश्च ताम्रैश्चमूपतयः।।४१ ।।

अङ्गुष्ठयवैराढयाः सुतवन्तोऽङ्गुष्ठमूलजैश्च यवैः।

दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव।।४२ ।।

यवो यवाकार एव। अङ्गुष्ठमध्यगतैर्यवैराढया धनिनो भवन्ति। अङ्गुष्ठमूलजातैर्यवैः सुतवन्तः पुत्रवन्तः। दीर्घाङ्गुलिपर्वाणः दीर्घाण्यङ्गुलिपर्वाणि येषां ते सुभगाः सौभाग्योपेता दीर्घायुषश्चिरजीविनश्च भवन्ति।।

अन्यदप्याह-

स्निग्धा निम्ना रेखा घनिनां तद्यत्ययेन निःस्वानाम्।

विरलाङ्गुलयो निःस्वा धनसञ्चियिनो घनाङ्गुलयः।।४३ ।।

स्निग्धना निर्मला निम्ना गम्भीरा रेखाः करगता धनिनामीश्वराणां भवन्ति। तद्व्यत्ययेन विपरीतेनास्निग्धा अनिम्ना निःस्वानां निर्धनानां भवन्ति। विरला विप्रकृष्टा अङ्गुलयः करशाखा येषां ते निःस्वा निर्धनाः। घनाङ्गुलयो धनसञ्चयिनो धनार्जनशीला भवन्ति।।४३ ।।

अन्यदप्याह-

वज्राकारा धनिनां विद्याभाजां च मीनपुच्छनिभाः।

शंखातपत्रशिविकागजाश्वपद्मोपमा नृपते।।४४, ४५।।

चक्रासिपरशुतोमरशक्तिधनुः कुन्तसन्निमा रेखाः।

कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः।।४६, ४७।।

ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः।

स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः।।५१, ५२।।

चिबुकमधरसयाधोभागो मुखान्तम्। अतिकृशैर्निर्मांसैरतिदीर्घैश्च चिबुकौर्निर्द्रव्या दरिद्रा भवन्ति। मांसलैश्चिबुकैर्धनोपेताः सधनाः। अधरैरोष्ठेर्विम्बोपमैरतिलोहितैरवक्रैः स्पष्टैर्भूपा राजानो भवन्ति। तनुभिरमांसलैरधरैररस्वा निर्धना भवन्ति।

ओष्ठैरुत्तरैः स्फुटितैर्भग्नैर्विखाण्डितैर्दलितैर्विवर्णैर्विगतवर्णै रूक्षै निःस्नेहैश्च धनपरित्यक्ता दरिद्रा भवन्ति। दशना दन्ताः स्निग्धा निर्मला घनाश्च संहता। सुतीक्ष्णदंष्ट्रा येषां ते समाश्च सर्वे तुल्याः शुभाः। मध्यभागवर्तिनो दन्तचतुष्टयस्य पार्श्ववर्तिनी दंष्ट्रे। तथा च-

अथ जिह्वाताल्वोर्लक्षणमाह-

जिह्वा रक्ता दीर्घा श्लक्ष्णा सषमा च भोगिनो ज्ञेया।
श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु।।५३ ।।

वक्त्रं सौम्यं संवृतममलं श्लक्ष्ण समं च भूपानाम्।
विपरीतं क्लेशभुजां महामुखं दुर्भगाणां च।।५४ ।।

स्त्रीमुखमनपत्यानां शाठयवतां मण्डलं परिज्ञेयम्।
दीर्धं निर्द्रव्याणां भीरुमुखाः पापकर्माणः।।५५ ।।
चतुरस्त्रं धूर्तानां निम्नं वक्रं च तनयरहितानाम्।
कृपणानामतिह्रस्वं सम्पूर्णंभोगिनां कान्तम्।।५६ ।।

स्त्रीसदृशं मुखं वदनमनपत्यानामपुत्राणां भवति। मण्डलं मण्डलाकारं परिवर्तुलं शाठ्यवतां शठभावसंयुक्तानां परिज्ञेयं ज्ञातव्यम्। शठः परकार्यविमुखः। दीर्धं मुखं निर्द्रव्याणां भवति। भीरुमुखा भीतस्येव मुखं येषां ते पापकर्माणः पापानुरता भवन्ति।

चतुरस्त्रं चतुष्कोणं मुखं धूर्तानां परवञ्चनदक्षाणां भवति। निम्नं हीनं वक्रमस्पष्टं च तनयर-हितानामपुत्राणां भवति। अतिह्रस्वमत्यल्पं कृपणानां भवति। कृपणोऽर्थलुब्धः स्तोकार्थश्च। सम्पूर्णं समांसलं कान्तं दीप्तिमद्भोगिनां भोगवतां च भवति। तथा च-

अथ श्मश्रुलक्षणमाह-

अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्नतं चैव।
रक्तैः परुषैश्चौराः श्मश्रुभिरल्पैश्च विज्ञेयाः।।५७ ।।

श्मश्रु कूर्चम्। अस्फुटिताग्रमभिन्नप्रान्तं स्निग्धं चारूक्षं मृदु कोमलं सन्नतं सम्यग् नतं शुभं प्रशस्तम्। केचिन्मृदुसमुन्नतं चैवेति। रक्तैलोहितैः परुषैः खरैरल्पैश्च श्मश्रुभिश्चौरास्तस्करा विज्ञेया ज्ञातव्याः। तथा च-

स्निग्धमस्फुटिताग्रं च सन्नतं श्मश्रु चेष्यते।

रक्तैरल्पैस्तथा रूक्षैः श्मश्रुभिस्तस्कराः स्मृताः।।इति।।५७।।

निर्मांसैः कर्णैः पापमृत्यवश्चर्पटैः सुबहुभोगाः।

कृपणाश्च हस्वकर्णाः शङ्कुश्रवणाश्चमूपतयः।।५८।।

रोमशकर्णा दीर्घायुषश्च धनभागिनो विपुलकर्णाः।

छिन्ननुरूपयागम्यगामिनो दीर्धया तु सौभाग्यम्।

आकुञ्चितया चौरः स्त्रीमृत्युः स्याच्चिपिटनासः।।६०, ६१।।

घनिनोऽग्रवक्रनासा दक्षिणविनताः प्रमक्षणाः क्रूराः।

ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सभाग्यानाम्।।६२।।

भोगति। अनिम्नावुच्चौ गण्डौ मुखगण्डौ यस्य स भोगी भोगवान् भवति। यस्य सम्पूर्णौ मांसलौ गण्डौ स मन्त्री सचिवो भवति। तथा च-

छिन्नेव या नासा दृश्यते, सा छिन्नानुरूपा, तयागम्यगामिनोऽगम्यगमनशीला भवन्ति। दीर्धया नासया सौभाग्यं भवति। आकुञ्चितया नासयाऽस्पष्टया नासया चौरस्तस्करो भवति। चिपिटनासश्च-र्पटघ्राणः स्त्रीमृत्युः स्याद् भवेत् स्त्री तस्य मारयति।

अग्रवका प्रान्तकुटिला नासा येषां ते धनिनो वित्तान्विताः। दक्षिणभागे विनता वक्रा नासा येषां ते प्रभक्षणा असञ्चयशीलाः क्रूरा विषमाश्च भवन्ति। ऋज्वी स्पष्टा स्वल्पच्छिद्रा अल्परन्ध्रा सुपुटा शोभनपुटा सभाग्यानां भाग्यसंयुक्तानां नासा भवति।। तथा च-

अथ क्षुतलक्षणमाह-

धनिनां क्षुतं सकृद्द्वित्रिपिण्डितं ह्लादि सानुनादं च।

दीर्घायुषां प्रभुक्तं विज्ञेयं संहतं चैव।।६३।।

ऐश्वर्यगम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांस ः।

अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवति।।६४,६५, ६६।।

मन्त्रित्वं स्थूलदृशां श्यावाक्षणां भवति सौभाग्यम्।
दीना दृग्निः स्वानां स्निग्धां विपुलार्थभोगवताम्।।६७।।

दीर्धासंसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीनाः।
मध्यविनतश्रुवो ये ते सक्ताः स्त्रीष्वगभ्यासु।।६८, ६९।।

अभ्युन्नताभिरभिमुख्येनोच्चाभिरल्पायुषः स्वल्पजीविनो भवन्ति। विशालाभिर्विस्तीर्णाभिरुन्नताभिरुच्चाभिरतिसुखिनो भवन्ति। ये सर्वे विषमभ्रुवोऽतुल्यभ्रुवस्ते दरिद्रा निर्धना भवन्ति। बालेन्दुसदृश्यो बालचन्द्रतुल्या नता भ्रुवो येषां ते सधनाः।

दीर्घाश्च ता असंसक्ता दीर्धासंसक्तास्ताभिर्दीर्घासंसक्ताभिर्भ्रूभिर्धनिनो भवन्तिः, खण्डाभिरर्थपरिहीना दरिद्रा भवन्ति। ये मनुष्या मध्यविनतभ्रुवो मध्याद् विनता अस्पष्टा भ्रुवो येषां ते अगम्यासु स्त्रीषु सक्ता निरता भवन्ति। तथा च-

अथ शङ्खललाटलक्षणमाह-

उन्नतविपुलैः शङ्खैर्धनिनो निम्नैः सुतार्थसन्त्यक्ताः।
विषमललाटा विधना धनवन्तोऽर्द्धेन्दुसदृशेन।।७०।।

शुक्तिविशालैराचार्यता शिरासन्ततैरधर्मरताः।
उन्नतशिराभिराढ्याः स्वस्तिकवत् संस्थितामिश्च।।७१।।

निम्नललाटा बधबन्धभागिनः क्रूरकर्मनिरताश्च।
अभ्युन्नतैश्चमूयाः कृपणाः स्युः संवृतललाटा।।७२।।

रुदितमदीनमनश्रुस्निग्धं च शुभावहं मनुष्याणाम्।
रूक्षं दीनं प्रचुराश्रु चैव न शुभप्रदं पुंसाम्।।७३।।

यद्रुदितमदीनं दैन्यरहितम्। अनुश्रु वाष्परहितम्। स्निग्धमरूक्षमेवंविधं मनुष्याणां पुरुषाणां शुभावहं प्रशस्तम्। रूक्षं परुषम्। दीनं दैन्ययुक्तम्। प्रचुराश्रु बहुवाष्पम्। पुंसां नराणां न शुभदम्। तथाच-

अथ हसितलक्षणमाह-

हसितं शुभदमकम्पं सनिमीलितलोचनं तु पापस्य।
दुष्टास्यं हसितमसकृत् सोन्मादस्यालकृत् प्रान्ते।।७४।।

यच्च हसितमकम्पं कम्परहितं तच्छुभदं प्रशस्तम्। शरीरस्य कम्पश्चलनमवयवानां येन नोत्पद्यते। सनिमीलितलोचनमतिसङ्कुचितनयनं हसितं पापस्य पापकर्मणः। असकृत् पुनः पुनर्दृष्टस्य सदोषस्य हसितम्। प्रान्ते हसनान्तेऽसकृतद्धसितं सोन्मादस्योन्मादयुक्तस्य भवति। तथा च-

अथ ललाटरेखालक्षणमाह-

विच्छिन्नाभिश्चागम्यगामिनो नवतिरप्यरेखेण।

केशान्तोपगताभी रेखाभिरशीतिवर्षायुः।।७५, ७६।।

भ्रूलग्नाभिस्त्रिंशद्विंशतिकश्चैव वामवक्राभिः।

क्षुद्राभिः स्वल्पायुर्न्यूनाभिश्चान्तरे कल्प्यम्।।७७, ७८।।

परिमण्डलैर्गवाढयाश्छत्राकारैः शिरोभिरवनीशाः।

चिपिटैः पितृमातृघ्नाः करोटिशिरासां चिरान्मृत्युः।।७९।।

घटमूर्धाध्वानरुचिर्द्विमस्तकः पापकृद्धनैस्त्यक्तः।

निम्नं तु शिरो महतां वहुनिम्नर्थदं भवति।।८०।।

परिमण्डलैः परिवर्तुलैः शिरोभिर्मस्तकैर्गवाढया गोबहुला भवन्ति। छत्राकारैश्छत्राकृतिभिरूर्ध्व-भागविस्तृतैरवनीशा राजानः। चिपिटैश्चर्पटैः पितृमातृघ्नाः। पितृमातृहन्तारः। करोटिशिरस्त्राणं करोटि-सदृशशिरसां चिराद्बहुकालेन मृत्युर्भवति।

घटमूर्धा कुम्भसदृशशिरा अध्वानरुचिरध्वशीलो भवति। द्विमस्तको द्विशीर्षःपापकृत् पापकर्ता धनैस्त्यको निर्धनो भवति। महतां प्रधानानामेव निम्नं तु शिरो भवति। बहुनिम्नमतिनिम्नं शिरोऽनर्थदं दुःखदं भवति।। तथा च-

अधुना मूर्धजलक्षणान्याह-

बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रपरुषह्रस्वाश्च।

अतिकुटिलाश्चातिधनाश्च मूर्धजा वित्तहीनानाम्।।८१, ८२।।

केशैरेकैकभवैः। एकैकस्मिन् रोमकूपे भवन्त्येकैकभवाः, तैस्तथाभूतैः। स्निग्धैररूक्षैः। कुष्णैरसितैः। आकुञ्चितैः कुटिलैः। अभिन्नग्रैरस्फुटितप्रान्तैः। मृदुभिः कोमलैः। न चातिबहुभिरघनैः। एवंविधैः केशैः सुखभाक् सुखितो भवति, नरेन्द्रो वा राजा भवति।

बहुमूला एकैकस्मिन् रोमकोपे बहूनां सम्भवात्। विषमा असमाः। केचिद् ह्रस्वाः केचिद् दीर्घाः। कपिलाः कपिलवर्णाः। स्थूला असूक्ष्माः। स्फुटिताग्रा भिन्नभिन्नप्रान्ताः। परुषा रूक्षाः। ह्रस्वा अदीर्घाः। अतिकुटिला अतिकुञ्चिताः। अतिधनाः सन्तता मूर्धजाः केशा वित्तविहीनानां निर्धनानां भवन्ति। तथा च -

आचार्येणोक्तम्- सामुद्रविद्वदति यातमनागतं वेत्यतोऽत्रास्माभिः सामुद्राणि पुरुषलक्षणान्युदाहृतानि यावदाचार्यस्य तेभ्योऽप्यधिकमस्तीति ज्ञेयम्।। इति।।

अधुनैतदेव सर्वं संक्षेपेणाह-

यद्यन्द्रात्रं रूक्षं मांसविहीनं शिरावनद्धं च।

तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम्।।८३।।

यद्गात्रमवयवं रूक्षमस्निग्धं मांसविहीनं निर्मांसं शिरावनद्धं शिरासन्ततं तत्तद्गात्रमनिष्टमशुभं प्रोक्तं कथितम्। अतोऽस्माद्विपरीतं सर्वं निःशेषं शुभं स्निग्धं समांसमशिरालमित्यर्थः।

अधुना महापुरुषलक्षणमाह-

त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः।

सप्तसु रक्तो राजा पञ्चसु दीर्घश्च सूक्ष्मश्च।।८४।।

यस्त्रिष्वङ्गेषु विपुलो विस्तीर्णः। गम्भीरस्त्रिष्वेव। षडुन्नतः षड् उन्नतानि यस्य। चतुर्ह्रस्वश्चतारि ह्रस्वानि यस्य। सप्तसु रक्तो लोहितः। पञ्चसु दीर्घश्चायामी। पञ्चस्वेव सूक्ष्मश्च स राजा नृपो भवति।

अथैतेषामेव प्रविभागमाह-

वक्षोऽथ कक्षा नखनासिकास्यं कृकाटिका चेति षडुन्नतानि।

ह्रस्वानि चत्वारि च लिङ्गपृष्ठं ग्रीवा च जङ्घे च हितप्रदानि।।८५, ८६।।

हनुलोचनबाहुनासिकाः स्तनयोरन्तरमत्र पञ्चमम्।

इति दीर्घमिदं तु पञ्चकं न भवत्येव नृणामभूभृताम्।।८७, ८८।।

नाभी शरीरमध्यस्थानम्। स्वरः शब्दः। सत्त्वं गुणभावः। तस्य लक्षणम्-

अविकारकरं सत्त्वं व्यसनाभ्युदयागमे।

छायाशुभाशुभफलानि निवेदयन्ती लक्ष्या मनुष्यपशुपक्षिसु लक्षणज्ञैः।
तेजोगुणान् बहिरपि प्रविकाशयन्ती दीपप्रभा
स्फटिकरत्नघटस्थितेव।।८९।।

छाया शरीरकान्तिः शुभानि अशुभानि च फलानि निवेदयन्ती कथयन्ती। लक्षणज्ञैश्छायाचिह्न-ज्ञैश्छाया लक्ष्या लक्षणीया, विचार्येत्यर्थः। केषु? मनुष्यपशुपक्षिषु। मनुष्याः, ,पुरुषा। पशवश्चतुष्पदाः। पक्षिणो विहङ्गमाः। सा च शरीरान्तर्वर्तिनी बहिरीप शरीरबोह्येऽपि तेजगुणान् तेजः सम्बन्धिगुणात् प्रकर्षेणातिशयेन विकाशयन्ती प्रकाशयन्ती। कथम? दीपप्रभा स्फटिकरत्नघटस्थितेव, स्फटिकश्चासौ रत्नं च तत् स्फटिकरत्नं, स्फटिकरत्नस्य घटः स्फटिकरत्नघटः , स्फटिकरत्नघटाभ्यन्तरस्थिता दीपप्रभा दीपकान्तिर्यथा बहिरपि तेजोगुणान् प्रविकाशयति, तथान्तरस्था छाया विकाशतीत्यर्थः।

तत्र तावत् पञ्चानां महाभूतानां सम्बन्धिन्यः, पञ्च च्छाया भवन्ति। प्रथमत एव जातक उक्तम्-

तत्रादावेव पार्थिवच्छायालक्षणमाह-

स्निग्धद्विजत्वग्रखरोमकेशाश्छाया सुगन्धा च महीसमुत्था।
तुष्ट्यर्थलाभाभ्युदयान् करोति धर्मस्य चाहन्यहनि प्रवृत्तिम्।।९०।।

स्निग्धा सिताच्छहरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान् करोति।
सर्वार्थसिद्धिजननी जननीव चाप्या छाया फलं तनुभृतां
शुभमादधाति।।९१।।

चण्डाधृष्या पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः।
आग्नेयीति प्राणिनां स्याज्जपायं क्षिप्रं सिद्धिं वाञ्छितार्थस्य दत्ते।।९२।।

मलिनपरुषकृष्णा पापगन्धानिलोत्था जनयति वधबन्धव्याध्यनर्थार्थनाशान्।
स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था श्रेयसां
स्वच्छवर्णा।।९३।।

अनिलोत्था वायुसमुत्था वायुसम्भवा छाया मलिनवर्णा अप्रसन्ना। परुषा रूक्षा। कृष्णा असिता। पापगन्था दुर्गन्धा। सा च जनयति उत्पादयति। वधो मरणम्। बन्धो बन्धनम्। व्याधयः पीडाः। अनर्थोऽलाभः। अर्थनाशः सञ्चितवित्तस्य क्षयः। एतान्।

अथ नाभस्याश्छायाया लक्षणमाह-स्फटिकेति। गगनोत्था आकाशजा छाया नाभसी। स्फटिक-सदृशरुपा स्फटिकमणेः सदृशं तुल्यं रूपं कान्तिर्यस्याः। अतिनिर्मलेत्यर्थः। भाग्ययुक्ता भाग्यैः समेता। अत्युदारा अतिशयेनोदारा दानशीला श्रेयसां सर्वेषां शुभकार्याणां निधिरिव। सर्वप्रदेत्यर्थः। सा च स्वच्छवर्णा निर्मलेति।।

अत्रैव परमतेनान्याः पञ्चच्छाया आह-

छायाः क्रमेण कुजलाग्न्यनिलाम्बरोत्थाः केचिद्वदन्ति दश ताश्च यथानुपूर्व्या।
सूर्याब्जनाभपुरुहूतयमोडुपानां तुल्यासु लक्षणफलैरिति तत्समासः।।९४।।

करिवृषरथौघभेरीमृदङ्गसिंहाभ्रनिः स्वना भूपाः।
गर्दभजर्जररूक्षस्वराश्च धनसौख्यसन्त्यक्ताः।।९५।।

सप्त भवन्ति च सारा मेदोमज्जात्वगस्थिशुक्राणि।
रुधिरं मांसे चेति प्राणभृतां तत्समासफलम्।।९६।।

ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः।
रक्ते तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः।।९७।।

ताल्वास्यपृष्ठभागः। ओष्ठौ दन्तच्छदौ। दन्तपाली दन्तमांसपङ्क्तिः। जिह्वा रसना। नेत्रान्तं चक्षुष्पर्यन्तम्। पायुर्गह्यस्थानम्। करौ हस्तौ। चरणौ पादौ। अस्मिन्नष्टके रक्ते लोहिते सति रक्तसारा नरा भवन्ति। ते च बहुभिः सुखैर्वनिताभिः स्त्रीभिर्बहुभिरर्थैर्धनैर्बहुभिः पुत्रैः सुतैश्च युताः संयुक्ता भवन्ति।।

अथ त्वग्मज्जामेदः सारानाह-

स्निग्धत्वक्का धनिनो मृदुभिः विचक्षणास्तनुभिः।
मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुताः।।९८।।

स्थूलास्थिरस्थिसारो बलवान् विद्यान्तराः सुरूपश्च।
बहुगुरुशुक्राः सुभगा विद्वांसो रूपवन्तश्च।।९९।।

उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः।
सङ्घात इति च सुश्लिष्टसन्धिः सुखभुजो ज्ञेया।।१००।।

स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंस्थः।

सुतधनसौभाग्ययुताः स्निग्धस्तैनिर्धना रूक्षैः।।१०१।।

पञ्चसु स्नेहो लक्ष्यो विचार्यः। केषु? वाचि वचने। जिह्वाया रसनायाम्। दन्तेषु रदेषु। नेत्रयोश्चक्षुषोः। नखेषु कररुहेषु। एतेषु संस्थः। तैश्च वागादिभिः सर्वैः स्निग्धैः सस्नेहैः सुतधनसौभाग्ययुता नरा भवन्ति। सुतः पुत्रः। धनं वित्तम्। सौभाग्यं सर्वजनानां लक्ष्यम्। एतैर्गुणैः संयुक्ताः। तैरैव सर्वै रूक्षैरस्निग्धैर्निर्धना दरिद्रा भवन्ति।।

अथ वर्णलक्षणमाह-

द्युतिमान् वर्णस्निग्धः क्षितिपानां मध्यमः सुतार्थवताम्।

रूक्षो धनहीनानां शुद्धः शुभदो न सङ्कीर्णः।।१०२।।

वर्णो गौरलोहितश्यामादिकः। वर्णः स्निग्धो यस्यासौ वर्णस्निग्धः स द्युतिमान् दीप्तिमान् भवति। स च क्षितिपानां राज्ञां भवति। मध्यमो वर्णो नातिरूक्षो नातिस्निग्धः ससुतार्थवतां पुत्रधनान्वितानां भवति। रूक्षो वर्णो धनहीनानां दरिद्राणां भवति। शुद्धो वर्णः स्निग्ध एव शुभदः प्रशस्तः। न सङ्कीर्णो व्यामिश्रवर्णः। क्वचित् स्निग्धः क्वचिद्रूक्षो न शुभदः। इति वर्णः।।

अथानूकलक्षणमाह-

साध्यमनूकं वक्त्रान्दोवृषशार्दूलसिंहगरुडमुखाः।

अप्रतिमप्रतापा जितरिपवो मानवेन्द्राश्च।।१०३।।

वानरमहिषवराहाजतुल्यवदनाः श्रुतार्थसुखभाजः।

गर्दभकरप्रतिमैर्मुखैः शरीरैश्च निःस्वसुखाः।।१०४।।

अष्टशतं षण्णवतिः परिमाणं चतुरशीतिरिति पुंसाम्।

उत्तमसमहीनानामङ्गुलसंख्या स्वमानेन।।१०५।।

भारार्धतनुः सुखभाक् तुलितोऽतो दुःखभाग्भवत्यूनः।

भारोऽतीवाढयानामध्यर्धः सर्वधरणीशः।।१०६।।

विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः।

अर्हति मानोन्मानं जीवितभागे चतुर्थे वा।।१०७।।

नारी स्त्रीं विंशतिवर्ष मानोन्मानमर्हति। मानं तुलामानम् उन्मानमूर्ध्वमानमङ्गुलादि। एवं पुरुषो नरो वर्षञ्चविंशत्या मानोन्मानर्हति, मानोन्मानयोगे भवति। खलुशब्दो वाक्यालङ्कारे। वर्षशतं जीवितप्रमाणं निश्चित्यं विंशतिवर्षा नारीत्युक्तम्। जीवितभागे चतुर्थेऽतीते वा मानोन्मानर्हति। वर्षशतादूने तु जीविते निश्चिते चतुर्थभाग इत्युक्तम्। इति मानम्।।

अथ प्रकृतिलक्षणमाह-

भूजलशिरन्यनिलाम्बरसुरनररक्षः पिशाचकातिरश्चाम्।
सत्त्वेन भवति पुरुषो लक्षणमेतभ्दवति तेषाम्।।१०८।।

महीस्वभावः शुभपुष्पगन्धः सम्भोगवान् सुश्वसनः स्थिरश्च।
तोयस्वभावो बहुतोयपायी प्रियाभिभाषी रसभाजनश्च।।१०९।।

अग्निप्रकृत्या चपलोऽतितीक्ष्णश्चण्डः क्षुघालुर्बहुभोजनाश्च।
वायोः स्वभावेन चलः कुशश्च च कोपस्य वशं प्रयाति।।११०।।

खप्रकृतिर्निपुणो विवृतास्यः शब्दगतैः कुशलः सुशिराङ्गः।
त्यागयुतः पुरुषो मृदुकोपः स्नेहरतश्च भवेत्सुरसत्त्वः।।१११।।

मर्त्यसत्वसंयुतो गीतभूषणप्रियः।
संविभागशीलवान् नित्यमेव मावनः।।११२।।

मर्त्यो नरः। तत्सत्त्वसंयुतो गीतभूषणप्रियः,गीतप्रियो भूषणप्रियः। भूषणानि अलङ्करणानि प्रियाणि यस्य। सम्याग्निभजनं संविभागः। संविभागवान् बान्धवानामुपकर्ता। शीलवान् चरित्रयुक्तः। नित्यं सर्वकालम्। मानवो मनुष्यो भवति।।

अथ रक्षः पिशाचानां लक्षणमाह-

तीक्ष्णप्रकोपः खलचेष्टितश्च पापश्च सत्त्वेन निशाचराणाम्।
पिशाचसत्त्वश्चपलो मलाक्तो बहुप्रलापी च समुल्बणाङ्गः।।११३।।

भीरुः क्षुधालुर्बहुभुक् च यः स्याज्ज्ञेयश्च सत्त्वेन नरस्तिरश्चाम्।
एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम्।।११४।।

शार्दूलहंससमदद्विपगोपतीनां तुल्या भवन्ति गतिभिः शिखिनां च भूपाः।

येवां च शब्दरहितं स्तिमितं च यातं तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः।।११५।।

श्रान्तस्य खनमशनं च वुभुक्षितस्य पानं तृषापरिगतस्य भयेषु रक्षा।
एतानि यस्य पुरुषस्य भवन्ति काले धन्यं वदन्ति खलु तं नरलक्षणज्ञाः।।११६।।

यस्य नरस्य श्रान्तस्य खिन्नस्य यानं वाहनमश्वादिकं भवति। बुभुक्षितस्याशनं भोजनं भवति। तुषापरिगतस्य पिपासां गतस्य पानं जलं भवति। भयेषूत्पन्नेषु रक्षा परिपालनम्। एतानि काले यथोपयुज्यमानानि भवन्ति। तं नरं धन्यं शुभलक्षणं वदन्ति कथयन्ति। नरलक्षणज्ञाः पुरुष-चिह्नविदः।।

१५. पञ्चमनुष्यविभागाध्यायः

ताराग्रहैर्बलयुतैः स्वक्षेत्रस्वोच्चगैश्चतुष्टयगैः।

पञ्च पुरुषाः प्रशस्ता जायन्ते तानहं वक्ष्ये।।१।।

ताराग्रहा बुधकुजजीवशुक्रसौराः तैस्ताराग्रहैः सबलैः स्थानदिक्चेष्टाकालबलयुक्तैः। स्वक्षेत्रगैः स्वराशाववस्थितैः। स्वोच्चगैः स्वेष्वात्मीयेषूच्चराशिषु व्यवस्थितैः। चतुष्टयगैर्लग्न-चतुर्थसप्तमदशमानाम-न्यतमेष्ववस्थितैरित्यर्थः। पञ्च पुरुषाः प्रशस्ता जायन्ते। तान् पुरुषानहं वक्ष्ये कथयिष्ये।।

अथैषां प्रविभागलक्षणमाह-

जीवेन भवति हंसः सौरेण शशः कुजेन रुचकश्च।

भद्रो बुधेन बलिना मालव्यो दैत्यपूज्येन।।२।।

जीवेन बृहस्पतिना बलयुतेन हंसो नाम पुरुषो भवति। एवं सौरेण शनैश्चरेण बलिना शशो भवति। कुजेनाङ्गारकेण बलिना रुचको नाम योगो भवति। बुधेन बलिना भद्रः। दैत्यपूज्येन शुक्रेण बलिना मालव्यो भवति। तथा च सारावल्याम् - **बृ.सं., पृ-२४८**

एतेषामर्कचन्द्रबलवशाद्विशेषमाह श्लोकद्वयेन —

सत्त्वमहीनं सूर्याच्छशरीरं मानसं च चन्द्रबलात्।

यद्राशिभेदयुक्तावेतौ तल्लक्षणंः स पुमान्।।३।।

तद्धातुमहाभूतप्रकृतिद्युतिवर्णसत्त्वरूपाः

अबलरवीन्दुयुतैस्तैः सङ्कीर्णा लक्षणैः पुरुषाः।।४।।

सत्त्वमहीनं सूर्यादिति। सत्त्वं गुणभागः अहीनं परिपूर्णम्, सूर्यादादित्यात् तुल्यस्य पुरुषस्य भवति। बलवशात् शारीरं देहगुणस्तनोः कान्तिः। मानसं बलमवस्कन्दता। तच्चन्द्रबलात् चन्द्रबलवशाद्-भवति।कथमित्याह- यद्राशिभेदयुक्ताविति। एतावर्कचन्द्रौ यद्राशिभेदयुक्तौ यस्मिन् राशिभेदे होराद्रेष्काणन-वांशद्वादशभागत्रिंशद्भागख्येः कुजादिसम्बन्धिनि स्वे वा युक्तौ स्थितौ तस्य राशिभेदस्य योऽधिपतिर्ग्रह-स्तल्लक्षणस्तै-र्लक्षणैर्युक्तः स पुमान् भवति। राशिभेदका जातके भेदाध्याये प्रोक्ताः।

तद्धातुमहाभूतप्रकृतिरिति। यद्राशिभेदयुक्तावेतौ तल्लक्षणः स पुमानित्युक्तम्। तत्र तद्धातुस्तदीय-स्तस्य धातुर्भवति। तद्यथा धातवः-

महाभूतानि पृथिव्यादीनां भौमादीनां ग्रहाणामुक्तानि। तद्यथा- शिखिभूखपयोमरुद्गणानामधिपा भूमिसुतादयः क्रमेण इति। अर्कचन्द्रयोर्वह्नयम्बुप्रकृतिर्वातपित्तश्लेष्मात्मिका। अथवा महीस्वभावः शुभपुष्प-गन्धः, इत्याद्युक्तम्। द्युतिः कान्तिश्छाया। चण्डाधृष्या पद्महेमाग्निवर्णा इति। द्युतिमान् वर्णस्निग्धः इत्यादिवर्णः। यथा- रक्तश्यामो भास्करं इत्यादि। सत्त्वं गुणभागः। सत्त्वग्रहणं गुणत्रयोपलक्षणार्थम्। त्रयो गुणाः सत्त्वरजस्तमांसि चन्द्रार्कजीवा इत्युक्ताः।

रूपं तथा- मधुपिङ्गलदृक् इत्यादि। आदिग्रहणाच्चेष्टास्वभावकर्मकौशलाः। एतैर्युक्तो भवति। रविचन्द्रौ सबलौ गृहहोराद्रेष्काणनवांशकद्वादशभागत्रिंशद्भागेषु यस्य यस्य ग्रहस्य स्थितौ तेषां ग्रहाणां ततन्महाभूतादिभिर्युक्तः पुमान भवति। अबलरवीन्दुयुतैरिति। तै राशिभेदैरबलवीन्दुयुतैर्बलरहितार्कचन्द्र-युक्तैर्लक्षणैः सङ्कीर्णाः व्यामिश्रास्ते पुरुषा भवन्ति। एतदुक्तं भवति- चन्द्रार्कयोर्बली यो यस्मिन् राशिभेदे भवत्येकस्तल्लक्षणो भवति स पुरुषः। अथ तावबलौ भवतस्तदा यत्रार्कः स्थितो यत्र चन्द्रः स्थितस्तै-र्व्यामिश्रैर्लक्षर्णर्युक्तो भवति। तथा च सारावल्याम् - **बृ.सं., पृ-२४९**

अथ कस्माद ग्रहात् को गुणो भवत्येतदाह-

भौमात् सत्त्वं गुरुता बुधात् सुरेज्यात् स्वरः सितात् स्नेहः।
वर्णः सौरादेषां गुणदोषैः स्वाध्यसाधुत्वम्।।५।।

सङ्कीर्णाः स्युर्न नृपा दशासु तेषां भवन्ति सुखभाजः।
रिपुगृहनीचोच्चच्युतसत्पापनिरीक्षणैर्भेदाः।।६।।

षण्णवतिररंगुलानां व्यायामो दीर्घता च हंसस्य।

यः सात्त्विकस्तस्य दया स्थिरत्वं सत्त्वार्जवं ब्राह्मणदेवभक्तिः।
रजोऽधिकः काव्यकलाक्रतुस्त्रीसंसक्तचितः पुरुषोऽतिशूरः।।८।।
तमोऽधिको वञ्चयितां परेषां मूर्खोऽलसः क्रोधपरोऽतिनिद्रः।

तमोऽधिक इति। यस्तमोऽधिकस्तामसः पुरुषः स परेषां वञ्चयितां वञ्चनशीलो मूर्खो जडः। असल आलस्यसंसक्तः। क्रोधपरः क्रोधी। अतिरिद्रश्च भवति। सत्त्वरजस्तमोभिस्त्रिभिर्मिभैस्तु ते पुरुषा मिश्रा मिश्रगुणा भवन्ति। ते च गुणैः स्वभेदैः सह सप्त

भवन्ति। तद्यथा- सत्त्वं रजस्तम इत्रि त्रयो भेदाः। सत्त्वरजसी रजस्तमसी सत्त्वतमसी त्रयः। सत्त्वरजस्तमसां त्रयाणां योगात्सप्तमः। एतद्राशिभेदव-शात्सङ्कीर्णवशाच्च सम्भवति।।

अथ मालव्यलक्षणमाह-

मालव्यो नागनासः समभुजयुगलो जानुसम्प्राप्तहस्तो

मांसैः पूर्णाङ्गसन्धिः समरुचिरतनुर्मध्यभागे कृशश्च।

पञ्चाष्टौ चोर्ध्वमास्यं श्रुतिविवरमपि त्र्यङ्गुलोनं च तिर्यग्

दीप्ताक्षं सत्कपोलं समतिसदशनं नातिमांसाधरोष्ठम्।।१०।।

मालवान् स भरुकच्छसुराष्ट्रान् लाटसिन्धुविषयप्रभृतींश्च।

विक्रमार्जितधनोऽवति राजा पारियात्रनिलयान् कृतबुद्धिः।।११।।

सप्ततिवर्षो मालव्योऽयं त्यक्ष्यति सम्यक् प्राणांस्तीर्थे।

लक्षणमेतत् सम्यक् प्रोक्तं शेषनराणां चातो वक्ष्ये।।१२।।

अयं मालव्यः सप्ततिवर्षः सप्ततिर्वर्षाणं जीवितपरिमाणं तस्य भवति। तीर्थेषु पुण्यस्थानेषु सम्यक् तपसा प्राणानसूँस्त्यक्ष्यति। म्रियत इति। एतत् सम्यक् मालव्यस्य लक्षणं प्रोक्तं कथितम्। शेषनराणां भद्रादीनां चातोऽनन्तरं वक्ष्ये कथयिष्ये। तथा च सारावल्याम्-

बृ.सं., पृ-२५२

अथ भंद्रलक्षणमाह-

उपचितसमवृत्तलम्बबाहुर्भुजयुगलप्रमितः समुच्छ्रयोऽस्य।

मृदुतनुघनरोमनद्धगण्डो भवति नरः खलु लक्षणेन भद्रः।।१३।।

अयं भद्रनामा बुधेन योऽसावुत्पद्यते योगंस्तस्येदं रूपं भवति। उपचितौ मांसलौ समौ तुल्यौ वृत्तौ परिवर्तुलौ लम्बौ दीर्धा बाहू यस्य। अस्य भद्रस्य भुजयुगलप्रमितः समुच्छ्रयो भवति। यावदस्य प्रसाधितमभुजद्वयस्य प्रमाणं तावदप्युच्छ्रायप्रमाणं भवति। मृदुतनुघनरोमनद्धगण्डः मृदुभिः कोमलैस्तनुभिः सूक्ष्मैः घनैः सन्ततै रोमभिर्नद्धौ संयुक्तौ गण्डौ मुखगण्डौ यस्य। तथाभूतो नरः। लक्षणेन बुधाख्येन योगेन भद्रसंज्ञो भवति। खल्वित्यव्ययं वाक्यालङ्कारे।।

अन्यदपि लक्षणं श्लोकद्वयेनाह-

त्वक्शुक्रसारः पृथुपीनवक्षाः सत्त्वाधिको व्याघ्रमुखः स्थिरश्च।

क्षमान्वितो धर्मपरः कृतज्ञो गजेन्द्रगामी बहुशास्त्रवेत्ता।।१४।।

प्राज्ञो वपुष्मान् सुललाटशङ्खः कलास्वभिज्ञो धृतिमान् सुकुक्षिः।

सरोजगर्भद्युतिपाणिपादो योगी सुनासः समसहंतभ्रूः।।१५।।

नवाम्बुसिक्तावनिपत्रकुङ्कुमद्विपेन्द्रदानागुरुतुल्यगन्धता।

शिरोरुहाश्चैकजकृष्णकुञ्चितास्तुरङ्गनागोपमगुह्यगूढता।।१६।।

हलमुशलगदासिशङ्खचक्रद्विपमराब्जरथाङ्कितांङ्घ्रिहस्तः।

विभवमपि जनोऽस्य बोभुजीति क्षमति हि न स्वजनं स्वतन्त्रबुद्धिः।।१७।।

अंगुलानि नवतिश्च षडूनान्युच्छ्रयेण तुलयापि हि भारः।

मध्यदेशनृपतिर्यदि पुष्टास्त्र्यादयोऽस्य सकलावनिनाथः।।१८।।

उच्छ्रयेणौच्च्येन षडूनानि नवतिरङ्गुलानि भवन्ति। चतुरशीतिरङ्गुलान्युच्छ्रितानि भवन्तीत्यर्थः। तुलयानि हि भारः। पलसहस्त्रद्वयमित्यर्थः। स च मध्यदेशनृपतिर्मध्यदेशे राजा भवति। यद्यस्य त्र्यादयोऽङ्गुलानि पुष्टाः। त्रिग्रहणेनाङ्गुलानि ज्ञापयति। तदुक्तमादौ शशकरुचकभद्रमालव्यसंज्ञितास्त्र्यङ्गुल-विवृद्धयेति। यदि पञ्चोतरमङ्गुलशतं व्यायामेन दैर्ध्येण च भवति, तदा सकलावनिनाथः सार्वभौमो राजा भवतीत्यर्थः।।

अन्यच्च वयोलक्षणमाह-

भुक्त्वा सम्यग्वसुधां शोर्येणोपार्जितामशीत्यब्दः।

तीर्थे प्राणांस्त्यक्त्वा भद्रो देवालयं याति।।१९।।

सम्यग् वसुधां भूमिं शौर्येण बलेनोपार्जितां भुक्त्वा। अशीतिरब्दानां जीवितप्रमाणैर्यस्या-सावशीत्यब्दः। तीर्थे पुण्यस्थाने। प्राणानसून् त्यक्त्वा भद्रो देवालयं स्वर्गं याति गच्छति। तथा च सारावल्याम् – **बृ.सं., पृ-२५४**

अथ शशलक्षणमाह-

ईषद्दन्तुरकस्तनुद्विजनखः कोशेक्षणः शीघ्रगो

विद्याधातुवणिक्क्रियासु निरतः सम्पूर्णगण्डः शठः।

सेनानीः प्रियमैथुनः परजनस्त्रीसक्तचितश्चलः

शूरो मातृहितो वनाचलनदीदुर्गेषु सक्तः शशः।।२०।।

दीर्घोऽङ्गुलानां शतमष्टहीनं साशङ्कचेष्टः पररन्ध्रविच्च।

सारोऽस्य मज्जा निभृतप्रचारः शशो ह्यतो नातिगुरुः प्रदिष्टः।।२१।।

मध्ये कृशः खेटकखड्गवीणा पर्यङ्कमालामुरजानुरूपाः।

शूलोपमाश्चोर्ध्वगताश्च रेखाः शशस्य पादोपगताः करे वा।।२२।।

मध्ये मध्यभागे कक्ष्याप्रदेशे कृशः क्षामः। खेटकः फरः। खड्गोऽसिः। वीणा बल्लकी। पर्यङ्कः प्रसिद्धः। आसनम्। माला स्त्रक्। मुरजो वादित्रविशेषः। एषा खेटकादीनामनुरूपाः सदृश्यो रेखाः। शूलोपमाश्च त्रिशूलसदृश्यः। ऊर्ध्वगता रेखाः शशस्य पादोपगताश्चरणस्थिताः। करे हस्तकले वा स्थिता भवन्ति।।

अन्यदपि वयोज्ञानादिकमाह-

अन्यदपि माण्डलिकोऽथवायं स्फिक्स्त्रावशूलाभिभवार्तमूर्तिः।

एवं शशः सप्ततिहायनोऽयं वैवस्वतस्यालयमभ्युपैति।।२३।।

अयं शशः। प्रात्पन्तिको गह्वरवास्निामधिपतिः। माण्डलिकोऽथवा राजा भवति। स्फिक्स्त्रावे स्फिक्वस्त्रवणे योऽसौ शूलस्तदभिभवेन तत्परिभवने पीडया चार्तमूर्तिः पीडितशरीरः। एवंविधः शशोऽयं सप्ततिहायनः सप्ततिवर्षो वैवस्वतस्यालयं यमस्य गृहमभ्युपैति। तथा च सारावल्याम् - **बृ.सं., पृ-२५६**

अधुना हंसलक्षणमाह-

रक्तं पीनकपोलमुन्नतनसं वक्त्रं सुवर्णोपमं

वृत्तं चास्य शिरोऽक्षिणी मधुनिभे सर्वे स रक्ता नखाः।

स्त्रग्दामाङ्कशशङ्खमत्स्ययुगलक्रत्वङ्गकुम्भाम्बुजै-

श्चिह्नैर्हंसकलस्वनः सुचरणो हंसः प्रसन्नेन्द्रियः।।२४।।

खट्वाङ्गवीणावृषचापवज्रशक्तीन्द्रशूलाङ्कितपाणिपादः।

भक्तो गुरुब्राह्मणदेवतानां शताङ्गुलः स्यात्तु सहस्त्रमानः।।२९।।

मन्त्राभिचारकुशलः कृशजानुजङ्घो विन्ध्यं ससह्यगिरिमुज्जयिनीं च भुक्त्वा।

सम्प्राप्य सप्ततिसमा रुचको नरेन्द्रः शस्त्रेण मृत्युमुपयात्यथवाऽनलेन।।३०।।

मन्त्रेषु कुशलः सक्तः। अभिचारेषु विद्वेषोच्चाटनवशीकरणमारणेषु कुशलः। कृशे दुर्बले जानुनी जङ्घे च यस्य। विन्धयं गिरिं विन्धयं पर्वतं ससह्यगिरि सह्येन गिरिणा सहितम्। उज्जयिनीं नगरी च भुक्त्वा नरेन्द्रो राजा सप्ततिसमाः सप्ततिवर्षाणि सम्प्राप्य शस्त्रेणायुधेनानलेनाग्निना वा मृत्युं मरणमुपयाति प्राप्नोति। सारावल्याम्-**बृ.सं., पृ-२५९**

अथ नृपानुकलक्षणं व्याख्यायते। तत्रादावेव तत्प्रविभागमाह-

पञ्चापरे वामनको जघन्यः कुब्जोऽथवा मण्डलकोऽथ साची।

पूर्वोक्तभूपानुचरा भवन्ति सङ्कीर्णसंज्ञः श्रृणु लक्षणैस्तान्।।३१।।

अतोऽस्मात् पञ्चयोगकादपरेऽन्ये वामनकादय एषामेव भूपानामनुचरा भवन्ति। तद्यथा- वामनको जघन्यः कुब्जः। अथवेति। अथशब्द आनन्तर्थे, वाशब्दश्चार्थे। मण्डलकः, अथ साची। एते पूर्वोक्तानां पञ्चानां भूपानामनुचरा भवन्ति। पूर्वोक्ताः प्राक् कथिता ये भूपा राजानां मालव्यादयः। एषामनुचराः सुहृदो भवन्ति के सङ्कीर्णसंज्ञाः पुरुषाः। तांश्च लक्षणैः श्रृणु।।

तत्र वामनकलक्षणमाह-

सम्पूर्णाङ्गो वामनो भग्नपृष्ठः किञ्चिच्चोरूमध्यकक्ष्यान्तरेषु।

ख्यातो राज्ञां ह्येष भद्रानुजीवी स्फीतो राजा वासुदेवस्य भक्तः।।३२।।

वामनसंज्ञः सम्पूर्णाङ्गः परिपूर्णावयवः। भग्नपृष्ठो भग्नं पृष्ठं यस्य। ऊरूप्रदेशे मध्ये मध्यभागे कक्ष्यान्तरेषु किञ्चिदीषद्भग्न एव किञ्जिदसम्पूर्णाङ्गः। राज्ञां पञ्चानां मध्ये एष वामनको भद्रानुजीवी भवति। भद्रस्यानु पश्चाज्जीवति। ख्यातः कीर्तियुक्तश्च। स्फीत ईश्वरो राजा भवति। स च वासुदेवस्य नारायणस्य च भक्तो भवति।।

अथ जघन्यलक्षणमाह-

मालव्यसेवी तु जघन्यनामा खण्डेन्दुतुल्यश्रवणः सुसन्धिः।

शुक्रेण सारः पिशुनः कविश्च रूक्षच्छविः स्थूलकराङ्गुलीकः।।३३।।

क्रूरो धनी स्थूलमतिः प्रतीतताम्रच्छविः स्यात् परिहासशीलः।

उरोऽङ्घ्रिहस्तेष्वसिशक्तिपाशपरश्वधाङ्कः स जघन्यनामा।।३४।।

कुब्जो नाम्ना यः स शुद्धो ह्यधस्तात् क्षीणः किञ्चित् पूर्वकाये नतश्च।
हंसासेवी नास्तिकोऽर्थैरुपेतो विद्वान् शूरः सूचकः स्यात् कृतज्ञः।।३५।।

कलास्वभिज्ञः कलहप्रियश्च प्रभूतभृत्यः प्रमदाजितश्च।
सम्पूज्य लोकं प्रजहात्यकस्मात् कुब्जोऽयमुक्तः सततोद्यतश्च।।३६।।

मण्डलकलक्षणमतो रुचकानुचरोऽभिचारवित् कुशलः।
कृत्यावेतालादिषु कर्मसु विद्यासु चानुरतः।। ३७।।

वृद्धाकारः खरपरुषमूर्धजश्च शत्रुनाशने कुशलः।
द्विजदेवयज्ञयोगप्रसक्तधीः स्त्रीजितो मतिमान्।।३८।।

साचीति यः सोऽतिविरूपदेहः शशानुगामी खलु दुर्भगश्च।
दाता महारम्भसमाप्तकार्यो गुणैः शशस्यैव भवेत् समानः।।३९।।

साचिति। य : साची नाम सोऽतिविरूपदेहोऽशोभनशरीरः। शशानुगामी शशस्यानुगामी पश्चाद् गच्छति। शशानुचरः। खल्वित्यव्ययं वाक्यालङ्कारे। दुर्भगो जनानामवल्लभः। दाता दानशीलः। महारम्भसमाप्तकार्यः महारम्भान् करोति तेषु च समाप्तकार्योऽन्तगः। गुणैः पूर्वोक्तैः शशस्यैवं समानः, सदृशस्तुल्यो भवेदित्यर्थः।।

अथ पुरुषलक्षणस्य प्रभावमाह-

पुरुषलक्षणमुक्तमिदं मया मुनिमतानि निरीक्ष्य समासतः।
इदमधीत्य नरो नृपसम्मतो भवति सर्वजनस्य च वल्लभः।।४०।।

मुनिमतानि ऋषिप्रणीतानि शास्त्राणि निरीक्ष्यावलोक्य समासतः संक्षेपतो मयेदं पुरुषलणमुक्तं कथितम्। इदं च पुरुषलक्षणं नरः पुरुषोऽधीत्य ज्ञात्वा नृपसम्मतो राज्ञां सम्मत इष्टो भवति। सर्वजनस्य च सर्वलोकस्य च वल्लभः प्रियो भवति। यतः पूर्वमेवाचार्येण द्वयं प्रतिज्ञातम्। यथा-

१६. कन्यालक्षणाध्यायः

तत्रादावेव पादलक्षणमाह-

स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्याः पादौ समोपचितचारुनिगूढगुल्फौ।

श्लिष्टाङ्गुली कमलकान्तितलौ च यस्यास्तामुद्वहेद् यदि

भुवोऽधिपतित्वमिच्छेत्।।१।।

ऊरू घनौ करिकरप्रतिमावरोमावश्वत्थपत्रसदृशं विपुलं च गुह्यम्।

श्रोणीललाटमुरुकूर्मसमुन्नतं च गूढो मणिश्च विपुलां श्रियमादधाति।।२, ३।।

विस्तीर्णमांसोपचितो नितम्बः गुरुश्च धत्ते रशनाकलापम्।

नाभिर्गभीरा विपुलाङ्गनानां प्रदक्षिणावर्तगता च शस्ता।।४।।

नितम्बः कटिभागः, स च विस्तीर्णः पृथुलो मांसोपचितः समांसलः;गुरुश्च गौरवयुक्तो रशनाकलापं धत्ते धारयति। रशनायाः कलापो रशनाकलापः। रशना मेखलाः, तस्याः कलापो विस्तारः ते धारयति। तथा च -

नाभिर्गभीरेति। अङ्गनानां स्त्रीणां नाभिर्गभीरा गम्भीरा, विपुला विस्तीर्णा, प्रदक्षिणावर्तेन च गता प्रशस्ता धन्या। तथा च-

अथ मध्यस्तनोरुवक्षोग्रीवालक्षणमाह-

मध्यं स्त्रियास्त्रिवलिनाथमरोमशं च वृत्तौ घनावविषमौ कठिनावुरस्यौ।

रोमप्रवर्जितमुरो मृदु चाङ्गनानां ग्रीवा च कम्बुनिचितार्थसुखानि दत्ते।।५।।

स्त्रियो योषितो मध्यं मध्यभागं त्रिवलिनाथं त्रिवलिस्वामिनं वलित्रयोवष्टिं वलित्रययुक्तमित्यर्थः। अरोमशं रोमरहितम्। तथाच -

वृत्तौ घनाविति। उरसि भवावुरस्यौ स्तनौ। वृत्तौ परिवर्तुलौ। घनौ सन्ततौ। अविषमावतुल्यौ। कठिनौ कर्कशो। तथा च -

अथाधरदन्तलक्षणमाह-

बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपभृत्।

कुन्दकुड्मलनिभाः समा द्विजा योषितां पतिसुखामितार्थदाः।।६।।

अधरोऽधरोष्ठो बन्धुजीवकुसुमोपमः, बन्धुजीवकुसुमसदृशोऽतिलोहित इत्यर्थः। मांसलो मांसोपेतः। रुचिरबिम्बरूपभृद् रुचिरस्य दीप्तियुक्तस्य विम्बस्य विम्बफलस्य तुल्यं रूपं बिभर्ति धारयति। तथा च-

अधरो बिम्बसङ्काशो मांसलोऽस्फुटितस्तथा।

यस्याः सा राजमहिषी कुमारी नात्र संशयः।।

कुन्दकुड्मलेति। द्विजा दन्ताः कुन्दकुड्मलनिभाःकुन्दः पुष्पविशेषः , तस्य कुड्मलानि कलिकाः, तन्निभास्तत्सदृशाः। समास्तुल्याः। योषितां स्त्रीणाम्। पतिसुखं भर्तृसुखम्। अमितमपरिमितं प्रभूतमर्थं धनं च ददति। तथा च गर्गः- **बृ.सं., पृ-२६७**

अथ वदनासिकादृशां लक्षणमाह-

दाक्षिण्ययुक्तमशठं परपुष्टहंसवल्गु प्रभाषितमदीनमल्पसौख्यम्।

नासा समा समपुटा रुचिरा प्रशस्ता दृङ्नीलनीरजदलद्युतिहारिणी च।।७।।

प्रभाषितं वचतं दाक्षिण्ययुक्तमानुकूल्यसंयुक्तं सुरसम्। अशठं शठभावहितम्। परपुष्टः कोकिलः। हंसः पक्षिविशेषः। तत्सदृशं वल्गु रम्यम्। तथा चादीनं दैन्यरहितं यदि भवति तदानल्पसौख्यं प्रभूतसौख्यम्। तथा च गर्गः- **बृ.सं., पृ-२६७**

नासा समेति। नासा नासिका समा स्पष्टा। समपुष्टा तुल्या नासापुटा। रूचिरा सुकान्ता प्रशस्ता शुभा। तथा च -

दृगिति। दृग्दृष्टिः नीलनीरजदलद्युतिहारिणी, नीलं च तन्नीरजं नीलनीरजं नीलोत्पलम्, तस्य दलं पत्रं तस्य द्यूतिं कान्तिं हरति तच्छीला नीलनीरजद्युतिहारिणी प्रशस्ता। तथा च-

अधुना भ्रूललाटलक्षणमाह-

नो सङ्गते नातिपृथू न लम्बे शस्ते भ्रुवौ बालशशाङ्कवक्रे।

अर्धेन्दुसंस्थानमरोमशं च शस्तं ललाटं न नतं न तुङ्गम्।।८।।

भ्रुवौ नो सङ्गते न श्लिष्टे। नातिपृथू विस्तीर्णे। न लम्बे नातिसङ्गते। बालशशाङ्कवक्रे। शशाङ्के चन्द्रे बालो यः शशाङ्कश्चन्द्रो द्वितीयायां तिथौ तद्वद्वक्रे कुटिले शस्ते। तथा च-

अर्धेन्दुसंस्थानमिति। ललाटं मुखपृष्टमर्धेन्दुसंस्थानमर्धचन्द्राकारमरोमशं रोमरहितम् न नतं न निम्नं न तुङ्गं नोच्चम्। समं शस्तं प्रशस्तामित्यर्थः। तथा च-

अथ कर्णकेशशिरोलक्षणमाह-

कर्णयुग्ममपि युक्तमांसलं शस्यते मृदु समाहित समम्।
स्निग्धनीलमृदुकुञ्चितैकजा मूर्धजाः सुखकराः समं शिरः।।९।।

कर्णयुग्मं श्रोत्रद्वयमपि युक्तमांसलं न निर्मांसमित्यर्थः। मृदु कोमलं समं तुल्यं समाहितं संलग्नं शस्यते स्तूयते। तथा च-

स्निग्धेति। मूर्धजाः केशाः स्निग्धा निर्मला नीला अतिकृष्णवर्णाः। मृदवः कोमलाः कुञ्चिताः कुटिलाः। एकजा एकजा एकरोमकूपे भवाः। सुखकराः सुखं कुर्वन्ति। तथा च -

समं शिरः, शिरः समं न निम्नं नोन्नतं सुखकरमेव। तथा च-

अथ हस्तपादयोर्लक्षणमाह-

भृङ्गारासनवाजिकुञ्चररथश्रीवृक्षयूपेषुभि-
र्मालाकुण्डलचामराङ्कुशयवैः शैलैर्ध्वजैस्तोरणैः।
मत्स्यस्वस्तिकवेदिकाव्यजनकैः शङ्खातपत्राम्बुजैः
पादे पाणिलेऽथवा युवतयो गच्छन्ति राज्ञीपदम्।।१०।।

निगूढमणिरबन्धनौ तरुणपद्मगर्भोपमौ करौ नृपतियोषितस्तनुविकृष्टपर्वाङ्गुली।
न निम्नमति नोन्नतं करतलं सुरेखान्वितं करोत्यविधवां चिरं
सुतसुखार्थसम्भोगिनीम्।।११।।

मध्याङ्गुलिं या मणिबन्धनोत्था रेखा गता पाणितलेऽङ्गनायाः।
ऊर्ध्वस्थिता पादतलेऽथवा या पुंसोऽथवा राज्यसुखाय सा स्यात्।।१२।।

अङ्गनायाः स्त्रियाः पाणितले हस्ततले या रेखा मणिबन्धनोत्था हस्तमूलाज्जाता मध्याङ्गुलिं यावद्गता। अथवा या रेखा पादतले चरणतले ऊर्ध्वस्थितां पुंसः पुरुषस्य। अथ चैवंविधा हस्ततले पादतले वा भवति, सा राज्यसुखाय स्याद् भूयात्। राज्यमुखं करोतीत्यर्थः। तथा च-

अन्यदप्याह-

कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तरालम्।
करोति रेखा परमायुषः सा प्रमाणमूना तु तदूनमायूः।।१३।।

या रेखा कनिष्ठिकामूलभवा कनिष्ठामूादुत्पत्रा तत्प्रदेशिन्या अङ्गुष्ठसमीपवर्तिन्या मध्यमिकाया-श्चान्तरालं मध्यं गता प्राप्ता सा रेखा परमायुषः प्रमाणं करोति। विंशत्यधिकं सा वर्षशतं जीवतीत्यर्थः। यद्यूना भवति तदायुरूनमेव भवति। रेखानुसारेण स्वबुद्धया ह्यूहनीयम्। तथा च-

अथाऽपत्यज्ञानमाह-

अङ्गुष्ठमूले प्रसवस्य रेखाः पुत्रा बृहत्यः प्रमदास्तु तन्व्यः।

अच्छिन्नमध्या बृहदायुषस्ताः स्वल्पायुषां छिन्नलघुप्रमाणाः।।१४।।

इतीदमुक्तं शुभमङ्गनानामतो विपर्यस्तमनिष्ठमुक्तम्।

विशेषतोऽनिष्टफलानि यानि समासतस्तान्यनुकीर्तव्यामि।।१५।।

कनिष्ठिका वा तदनन्तरा वा महीं न यस्याः स्पृशति स्त्रियाः स्यात्।

गताथवाऽङ्गुष्ठमतीत्य यस्याः प्रदेशिनी सा कुलटाऽतिपापा।।१६।।

उद्वद्धाभ्यां पिण्डिकाभ्यां शिराले शुष्के जङ्घे लोमशे चातिमांसे।

वामावर्तं निम्नमल्पं च गुह्यं कुम्भाकारं चोदरं दुःखितानाम्।।१७।।

ह्रस्वयातिनिः स्वता दीर्घया कुलक्षयः।

ग्रीवया पृथूत्थया योषितः प्रचण्डता।।१८।।

ग्रीवया शिरोधरया। अतिह्रस्वया अतिप्रमाणहीनया। निःस्वता निर्धनता भवति। अतिदीर्धया प्रमाणाधिकया कुलक्षयो वंशविनाशः। पृथूत्थया पृथूत्पन्नया चर्पटया ग्रीवया योषितः स्त्रियाः प्रचण्डता क्रूरता भवति। तथा च-

अथ नेतत्रगण्डयोर्लक्षणमाह-

नेत्रे यस्याः केकरे पिङ्गले वा सा दुःशीला श्यावलोलेक्षणा च।

कूपौ यस्या गण्डयोश्च स्मितेषु निःसन्दिग्धं बन्धकीं तां वदन्ति।।१९।।

यस्याः स्त्रिया नेत्रे चक्षुषी केकरे कातरे पिङ्गले कपिले वा सा दुःशीला असाध्वी भवति। तथा श्यावे श्याववर्णे लोले चञ्चले चलमाने ईक्षणे चक्षुषी यस्याः सापि दुःशीला भवति। तथा च-

कूपौ यस्या इति। यस्या योषितः स्मितेषु हसितेषु गण्डयोर्मुखगण्डयोः कूपौ गर्ताकारौ भवतश्छिद्रे दृश्येते। तां स्त्रिंय निःसन्दिग्धमसंशयं बन्धकीमसाध्वीं वदन्ति कथयन्ति। तथा च-

तथा च पराशरः- **बृ.सं., पृ-२७४**

अन्यदप्याह-

प्रविलम्बिनि देवरं ललाटे श्वशुरं हन्त्युदरे स्फिजोः पतिं च।

अतिरोमचयान्वितोत्तरोष्ठी न शुभा भर्त्तुरतीव या च दीर्घा।।२०।।

स्तनौ सरोमौ मलिनोल्बणौ च क्लेशं दधाते विषमौ च कर्णौ।

स्थूलाः कराला विषमाश्च दन्ताः क्लेशाय चौर्याय च कृष्णमांसाः।।२१।।

क्रव्यादरूपैर्वृककाककङ्कसरीसृपोलूकसमाचिह्नैः।

शुष्कैः शिरालैर्विषमैश्च हस्तैर्भवन्ति नार्यः सुखवित्तहीनाः।।२२।।

हस्तैः करैः क्रव्यादरूपैश्चिह्नैश्चिह्नितैः क्रव्यादा मांसाशिनो विहगा गृध्रादयः। वृकः प्राणी। काकीङ्कौ प्रसिद्धौ पक्षिणौ। सरीसृपाः प्राणिनः कीटाः। उलूकः पक्षी। तत्समानैस्तत्दृशैश्चिह्नैः शुष्कैर्निर्मांसैः शिरालैः शिरासन्ततैर्विषमैरसमैश्च नार्यः स्त्रियः सुखवित्तहीनाः सुखैर्धनैश्च विरहिता वर्जिताश्च भवन्ति। तथा च-

अन्यदप्याह-

या तूत्तरोष्ठेन समुन्नतेन रूक्षाग्रकेशी कलहप्रिया सा।

प्रायो विरूपासु भवन्ति दोषा यत्राकृतिस्तत्र गुणा वसन्ति।।२३।।

या तु स्त्री समुन्नतेनोच्चतरेणोत्तरोष्ठेनोपलक्षिता। रूक्षाग्रकेशी रूक्षा अग्रकेशा यस्याः सा नित्यं कलहप्रिया कलहकरी भवति। तथा च-

प्रायो विरूपास्विति। प्रायो बाहुल्येन विरूपासु विगतरूपासु स्त्रीषु दोषा भवन्ति। यत्र यस्यां साऽऽकृति। शोभना भवति तत्र तस्यां गुणा वसन्ति।।

अधुना शरीरक्षेत्रविभागमाह-

नवमं नयने च सभ्रूणी सललाटं दशं शिरस्तथा।

अशुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनम्।।२४,२५, २६।।

पादौ सगुल्फाविति। पादौ चरणौ सगुल्फी गुल्फसहितौ प्रथममाद्यं दशाभागं च शुभाशुभं च शुभाशुभचिह्नितं प्रदिष्टमुक्तम्। जङ्घे सजानुचक्रे जानुचक्रारिकासहिते द्वितीयं दशाभागमुक्तम्। मेढ्रं लिङ्गमुरू द्वौ मुष्कौ वृषणौ ततोऽनन्तरमेतत् तृतीय् दशाभागम्। नाभिः कटिश्चेति चतुर्थं दशाभागमाहुः कथयन्तिअ

उदरमिति। उदरं पञ्चमं दशाभागं कथयन्ति प्रवदन्ति मुनयः। हृदयं स्तनान्वितं स्तनसंयुक्तं षष्ठं दशाभागं कथयन्ति। अथानन्तरमंसो स्कन्धौ जत्रुणी च सप्तमं दशाभागम्। ओष्ठौ द्वौ कन्धरा ग्रीवा एते ओष्ठकन्धरे अष्टमं दशाभागं कथयन्ति।

नयने नेत्रे सभ्रूणी भ्रूसहिते नवम् दशाभागम्। शिरो मूर्धा सललाटं ललाटसहितं दशमं दशाभागम्, तथा तनैव प्रकारेण। अथ यद्यपि सामान्येनोक्तम् तथापि परमायुः प्रमाणेन द्वादशवार्षिकीं दशां पिरकल्प्यं विचारः कर्तव्यः। ज्ञातायुस्तत्प्रमाणेन एतेषु क्षेत्रविभागेषु चरणाद्येषु वातप्रभृतिष्वशुभे-ष्वशुभमनिष्टं दशाफलं शुभेषु शोभनमिति। एतदुक्तं भवति- यद्गात्रं रूक्षं मांसविहीनं शिरावनद्धं च तदनिष्टं प्रोक्तम्। विपरीतमतः शुभं सर्वमित्यनेन क्रमेण यत्राङ्गेऽशुभलक्षणानि तद्दशाभागमशुभम् , यत्र शुभानि तत् शोभनम्, यत्र व्यामिश्राणि तन्मध्यमिति।।

१७. वस्त्रच्छेदलक्षणाध्यायः

तत्रादावेवाश्विन्यादीनां नक्षत्राणामभिनववस्त्रोपभोगे फलमाह-

भुजङ्गभे विलुप्यते मृत्युमादिशेत्।

भगाह्वये नृपाद्भयं धनागमाय चोत्तरा।।,१,२,३।।

सहृयद्युतिश्चि मित्रभे तदग्रभेऽम्बरक्षयः।

जलप्लुतिश्च नैर्ऋते रुजो जलाधिदैवते।।४, ५।।

भद्रपदासु भयं सलिलोत्थं तत्परतश्च भवेत्सुतलब्धिः।

रत्नयुतिं कथयन्ति च पौष्णे योऽभिनवाम्बरमिच्छति भोक्तुम्।।६, ७।।

प्रभूतवस्त्रदाश्विनीति। अश्विनीनक्षत्रे यदभिनवं वस्त्रमुपभुज्यते, तदा साऽश्विनी प्रभूतवस्त्रदा भवीत। प्रभूतानि बहूनि वस्त्राणि अम्बराणि ददाति। अथानन्तरमेवं भरणी वस्त्रापहारिणी भवति। अग्निदैवते कृत्तिकानक्षत्रे वस्त्रं सन्दह्यतेऽग्निना। प्रजेश्वरे रोहिण्यामर्थानां सिद्धयः प्राप्तयो भवन्ति।

मृगे इति। मृगे मृगशिरसि मूषकाद्वस्त्रभयं भवति। तेन छिद्यते। शाङ्करे आर्द्रायां व्यसुत्वं विगतप्राणता भवति, म्रियत इत्यर्थः। पुनर्वसौ शुभस्यार्थस्य धर्मादेरागमःप्राप्ति र्भवति। तदग्रथे तस्य पुनर्वसोरग्रतः पुरतः स्थिते भे नक्षत्रे तिष्ये धनैर्वितैर्युतिः संयोगो भवति।

भुजङ्गभे इति। भुजङ्गभे श्लेषायां वस्त्रं विलुप्यते छिद्यते। मघासु मृत्युं मरणमादिशेद् वदेत्। भगाह्वये पूर्वफल्गुन्यां नृपाद् राज्ञो भयं भवति। उत्तरफल्गुनी धनागमाय धनप्राप्तये भवति।

करेणेति। करेण हस्तेन कर्मणां सिद्धयो भवन्ति। चित्रायां शुभागयः शुभस्यार्थस्य धर्मादेरागमः प्राप्तिर्भवत। अनिले स्वतौ शुभं शोभनं भोज्यमाहारं भवति। द्विदैवते विशाखायां जनप्रियो जनवल्लभो भवति।

सुहृद्युीतश्चेति। मित्रभेऽनुराधायां सुहृद्युतिर्मित्रसंयोगः। तदग्रथे तस्या अनुराधाया अग्रतः पुरतः स्थिते भे नक्षत्रे ज्येष्ठायामम्बरस्य वस्त्रस्य क्षयो विनाशो भवति। नैर्ऋते मूले जलप्लुतिर्वस्त्रं जलमध्ये प्लवति। यातीत्यर्थः। जलाधिदैवते पूर्वाषाढायां रुजो रोगा भवन्ति।

सुहृद्युतिश्चेति। वैश्वदेवे उत्तराषाढायां मिष्टान्न भोजनं भवति। वैष्णवे श्रवणे नेत्ररोगता चक्षुष्पीडा। वासवे धनिष्ठायां धान्यानां लब्धिं लाभम्। विदुर्जानते। वारुणे शतभिषजि महदतीवं भयं विषकृतं विषोत्पन्नं भवति।

अथ सर्वनक्षत्राणां कर्मयोगितामाह-

भोक्तुं नवाम्बरं शस्तमृक्षेऽपि गुणवर्जिते।

विवाहे राजसम्माने ब्राह्मणानां च सम्मते।।८।।

वस्त्रस्य कोणेषु वसन्ति देवा नराश्च पाशान्तदशान्तमध्ये।

शेषास्त्रयश्चात्र निशाचरांशास्तथैव शय्यासनपादुकासु।।९।।

नवकोष्ठविभक्तस्य वस्त्रस्य न्यासः-

देवाः	राक्षसाः	देवाः
नराः	राक्षसः	नराः
देवाः	राक्षसाः	देवा

प्रयोजनमाह-

लिप्ते मषीगोमयकर्दमाद्यैश्छिन्ने प्रदग्धे स्फुटिते च विन्द्यात्।

पुष्टं नवेऽल्पाल्पतरं च भुक्ते पापं शुभं चाधिकमुत्तरये।।१०।।

वस्त्रं मष्या कज्जलेन गोमयेन कर्दमेन चालिप्ते। आदिग्रहणाद्येन केनचिद् वर्णकेन् लिप्ते। तथा छिन्ने प्रकल्पिते। प्रदग्धेऽग्निना प्लुष्टे। स्फुटिते पाटिते च विन्द्याद् जानीयात् पापमशुभं फलं शुभं वा। नववस्त्रदिकेषु पुष्टं परिपूर्णं मध्यमेऽल्पं भुक्ते शीर्णेऽल्पतरम्। यद्यप्युक्तं तथैव शय्यासन-पादुकास्विति, तथाप्युत्तरीये वस्त्रेऽधिकतरं पापमशुभं शुभं शुभफलं भवति।।

अधुना विशेषेमाह-

रुग्राक्षसांशेष्वथवापि मृत्युः पुंजन्म तेजश्च मनुष्यभागे।

भागेऽमराणामथ भोगवृद्धिः प्रान्तेषु सर्वत्र वदन्त्यनिष्ठम्।।११।।

कङ्कप्लवोलूककपोतकाकक्रव्यादगोमायुखरोष्ट्रसर्पैः।

छेदाकृतिर्दैवतभागगापि पुंसां भयं मृत्युसमं करोति।।१२।।

छत्रध्वजस्वस्तिकवर्धमानश्रीवृक्षकुम्भाम्बुजतोरणाद्यैः।

छेदाकृतिर्नैर्ऋतभागगापि पुंसां विदत्ते न चिरेण लक्ष्मीम्।।१३।।

१८. चामरलक्षणाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

देवैश्चमर्यः किल वालहेतोः सृष्टा हिमक्ष्माधरकन्दरेषु।
आपीतवर्णाश्च भवन्ति तासां कृष्णाश्च लाङ्गूलभवाः सिताश्च।।१।।

किलेत्यागमसूचने। देवैः सुरैर्वालहेतोर्वाहननिमित्तं हिमक्ष्माधरकन्दरेषु हिमवद्-गिरिगुहासु चमर्यः प्राणिविशेषाः सृष्टा उत्पादिताः। तासां चमरीणामापीतवर्णा वाला भवन्ति। कृष्णा असिताश्च भवन्ति। तथा लाङ्गूलभवाः पुच्छसम्भूताः सिताः श्वेतवर्णाश्च भवति।।

अथ तासां गुणमाह-

स्नेहो मृदुत्वं बहुवालता वा वैशद्यमल्पास्थितिबन्धनत्वम्।
शौक्ल्यं च तासां गुणसम्पदुक्ता विद्धाल्पलुप्तानि न शोभनानि।।२।।

तासां चमरीणामियं गुणानां सम्पदुक्ता कथिता। तद्यथा- स्नेहोऽरूक्षता। मृदुत्वं मार्दवम्। बहुवालता प्रभूतवालत्वम्। वैशद्यं निर्मलता परस्परमश्लेषश्च। अल्पास्थिनिबन्धनत्वं निबध्यन्तेऽ-स्मिन्नित निबन्धनम्। यत्रास्थिमालाः संलग्नास्तस्याल्पत्वम्। शौक्ल्यं शुक्लता चैतानि यानि च विद्धानि निबन्धस्य विद्धत्वात् तानि च विद्धानि खण्डतास्फोटनं वा तेषां विद्धत्वम्। अल्पानि ह्रस्वानि। लुप्तानि विच्छिन्नानि। एतानि न शोभनान्यशोभनानि। अशुभानीति।।

अथ चामरदण्डलक्षणान्याह-

अध्यर्धहस्तप्रतिमतोऽस्य दण्डो हस्तोऽथवाऽरत्निसमोऽथवाऽन्यः।
काष्ठाच्छुभात् काञ्चनरूप्यगुप्ताद् रत्नैश्च सर्वैश्च हिताय राज्ञाम्।।३।।

अस्य चामरस्याध्यर्धहस्तप्रमितः सार्धहस्तमितो दण्डः कार्यः। हस्तोऽथवा हस्तप्रमाणः। अन्योऽपरोऽत्निसमः कार्यः। अरत्निः कृतमुष्टिहस्तः। कनिष्ठासम इति केचित्। स च दण्डः काष्ठाच्छुभात् प्रशस्तलक्षणयुक्तः कार्यः। किम्भूतात्? काञ्चनरूप्यगुप्तात् काञ्चनेन सुवर्णेन रूप्येण रजतेन वा सुगुप्तादाच्छादितात् रत्नैश्च मणिविशेषैर्विचित्रैर्नानावर्णैश्च सहिताद् राज्ञां नृपाणां हिताय भवति।।

अथ वर्णक्रमेण दण्डलक्षणमाह-

यष्ट्यातपत्राङ्कुशवेत्रचापवितानकुन्तध्वजचामराणाम्।
व्यापीततन्त्रीमधुकृष्णवर्णा वर्णक्रमेणैव हिताय दण्डाः।।४।।

यष्टिः प्रसिद्धा नित्यकालं हस्ते उह्यते। आतपत्रं छत्रम्। अङ्कुशः प्रसिद्धो गजदमनायोपयुज्यते। वेत्रो दण्डः प्रसिद्ध एव। चापं धनुः। वितानं कनकमिति लोके प्रसिद्धम्। कुन्तमायुधम्। ध्वजश्चिह्नम्। चामरं वालव्यजनम्। एतेषां दण्डवर्णाः क्रमेण व्यापीतितन्त्रीमधुकृष्णवर्णा हिताय भवन्ति। तद्यथा- ब्राह्मणानां यष्टयः पीतवर्णा हिताय प्रशस्ताय। एवं तन्त्रीवर्णाः पीतलोहिताः क्षत्रियाणाम्।मधुवर्णा ईषत्पीता वैश्यानाम्। कृष्णवर्णाः शूद्रणामिति। तथा च गर्गः- **बृ.सं., पृ-२८५**

दण्डादेः समपर्वणः फलमाह-

मातृभूधनकुलक्षयावहा रोगमृत्युजननाश्च पर्वभिः।
द्वयादिभिर्द्विकविवर्धितैः क्रमात् द्वादशान्तविरतैः समैः फलम्।।५।।

यात्राप्रसिद्धिर्द्विषतां विनाशो लाभाः प्रभूता वसुधागमश्च।
वृद्धिः पशूनामभिवाञ्छिताप्तिस्त्र्याद्येष्वयुग्मेषु तदीश्वराणाम्।।६।।

तदीश्वराणां दण्डादीनां स्वामिनां त्र्याद्येष्वयुग्मेषु पर्वसु द्विकविवर्धितेष्विमानि फलानि भवन्ति। तद्यथा- दण्डादिषु त्रिभिः पर्वभिर्यात्रायाः प्रसिद्धिर्विजयो भवति। पञ्चभिर्द्विषतां शत्रूणां विनाशः। सप्तभिः प्रभूता बहवो लाभा लब्धयः। नवभिर्वसुधागमो भूलाभः। एकादशभिः पशूनां चतुष्पदानां वृद्धिः। त्रयोदशभिर्वाञ्छितस्याभीष्टस्य प्राप्तिर्लाभो भवति। द्वादशत्रयोशभ्य। न विशेषफलमिति।।

१९. छत्रलक्षणाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

दण्डार्धविस्तृतं तत् समावृतं रत्नभूषितमुदग्रम्।

नृपतेस्तदातपत्रं कल्याणपरं विजयदं च।।१,२, ३।।

निचितमिति। नृपते राज्ञः। तदातपत्रयेवंविधं कल्याणपरं श्रेयस्करम्। विजयदं च भवति विजयं च ददाति। कीदृशम ? निचितं तु हंसपक्षैः। हंसः पक्षी तत्पक्षैस्तदङ्गरुहैर्निचितं रचितम्। कृकवाकुः कुक्कुटः। मयूरसारसौ प्रसिद्धौ। कृकवाकुमयूरसारसानां वा पक्षैर्निचितम्। दौकूल्येन श्वेतपट्टविशेषेण नवेनाहतेन समन्ततः समन्ताच्छादितं शुक्लं श्वेतवर्णम्।

मुक्ताफलैरिति। मुक्ताफलैर्मुक्तामणिभिरुपचितं संयुक्तम्। प्रलम्बाभिर्लम्बमानाभिर्मूक्ता-माला-भिराविलं समन्ततो युक्तम्। स्फटिकमूलम्। मूले स्फटिकोपलो यस्य। एकदण्डं षड्हस्तप्रमाणम्। शुद्धहैमं श्रेष्ठसुवर्णेनाच्छादितम्। नवभिः पर्वभिर्नगैः सप्तभिर्वा युक्तम्। एकदण्डमित्यनेनैतज्ज्ञापयति। यथैकवृक्षोद्भवो दण्ड कार्यः। न विजातीयैः खण्डखण्डैः कार्य इत्यर्थः।

तच्छत्रं दण्डार्धविस्तृतं कार्यम्। दण्डं षड्ढस्तप्रमाणं तदर्धविस्तृतं हस्तत्रविस्तीर्ण विष्कम्भप्रमाण-मेतदित्यर्थः। समावृतं समन्तादावृतं सुश्लिष्टासन्धिरिति यावत्। रत्नैर्मणिभि-र्भूषितमलङ्कृतं दण्डमुदग्रं श्रेष्ठामिति। तथा च गर्गः- **बृ.सं., पृ-२८७**

अथ युवराजनृपतिपत्निसेनापतिदण्डनायकानां छत्रलक्षणमाह-

युवराजनृपतिपत्न्योः सेनापतिदण्डनायकानां च।

दण्डोऽर्धपञ्चहस्तः समपऽचकृतोऽर्धविस्तारः।।४।।

अन्येषामुष्णध्नं प्रसादपट्टैर्विभूषितशिरस्कम्।

व्यालम्बिरत्नमालं छत्रं कार्य तु मायूरम्।।५।।

अन्येषां तु नराणां शीतातपवारणं तु चतुरस्त्रम्।

समवृत्तदण्डयुक्तं छत्रं कार्यं तु विप्राणाम्।।६।।

अन्येषां सामान्यानां नराणां पुरुषाणां शितातवपवारणं शीतमातपं यद्वारयति रक्षति तच्छत्रं चतुरस्त्रं चतुष्कोणं कार्यम्। विप्राणां ब्राह्मणानां समवृतं समन्ततः परिवर्तुलं दण्डयुक्तं छत्रं कार्यमिति।।

२०. स्त्रीप्रशंसाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनमाह-

जये घरित्र्याः पुरमेव सारं पुरे गृहं सद्मनि चैकदेशः।

तत्रापि शय्या शयने वरा स्त्री रत्नोज्ज्वला राज्यसुखस्य सारः।।११।।

धरित्र्या भूमेर्जये विजये सति पुरमेव सारं समस्तवसुधां जित्वा ततः पुरमान्नसारः। तत्र च पुरे गृहं वेश्म एकमेव सारः। तस्मिन् सद्मनि गृहे च एकदेशः कश्चित् सारः श्रेष्ठः। तत्रापि तस्मिन्नपि गृहैकदेशे शय्या आस्तरणं सारः। तस्मिन् शयने वरा स्त्री प्रधाना युवतिः सा च रत्नोज्ज्वला मणिकनकभूषिता। एतन्मात्रं राज्यसुखस्य सार इति। अन्यत् सर्वमसारमित्यर्थः।।

अथ स्त्रीप्रशंसार्थमाह-

रत्नानि विभूषयन्ति योषा भूषयन्ते वनिता न रत्नकान्त्या।

चेतो वनिता हरन्त्यरत्ना नो रत्नानि विनाङ्गनाङ्गसङ्गम्।।२।।

रत्नान्येतत् कर्मपदम्। योषाः स्त्रियो रत्नानि विभूषयन्ति शोभयन्ते। वनिताः स्त्रियः पुनर्न रत्नकान्त्या मणिदीप्तया भूष्यन्ते। यतो वनिता अरत्ना रत्नविवर्जिताश्चेतो मनो हरन्ति। रत्नानि पुनरङ्गनाङ्गसङ्ग विना चेतो न हरन्ति। यावत् स्त्रिया अङ्गे न शिलष्टानि तावच्चित्तहराणि न भवन्ति।।

अन्यदप्याह-

आकारं विनिगूहतां रिपुबलं जेतुं समुत्तिष्ठतां

तन्त्रं चिन्तयतां कृताकृतशतव्यापारशाखाकुलम्।

मन्त्रितो क्तनिषेविणां क्षितिभुजामाशङ्किनां सर्वतो।

दुःखाम्भोनिधिवर्तिनां सुखलवः कान्तासमालिङ्गनम्।।३।।

कान्तासमालिङ्गनं वल्लभापरिष्वजनं सुखलवः सुखलेशः। केषाम्? राज्ञाम्। कीदृशानाम्? आकारं विनिगूहताम् आकारोऽन्तश्चेतसि सुखभयहर्षदिरूपरिवकारः। तथाभूतमाकारं विनिगृहतां प्रच्छादयताम्। तथा रिपुबलं शत्रुबलं जेतुमभिभवितुं समुत्तिष्ठातां प्रयत्नं कुर्वताम्। तन्त्रं चिन्तयतां मध्यायताम्। कीदृशं तन्त्रम्? कृताकृतशतव्यापारशाखाकुलम्

व्यापाराणां कर्मणां याः शाखाः विस्तारः , कृताश्च अकृताश्च कृताकृताः। कृताकृताश्च शतशो व्यापाराः कर्माणि त एव शाखाः। ताभिराकुलं व्याप्तम्। किलानायकतन्त्रं शतशाखाकुलं भवति। मन्त्रिप्रोक्तनिषेविणाम्, मन्त्रिभिः सचिवैर्यत् प्रोक्तं कथितं नीतिशास्त्रविहितं नियमं तन्निषेविणां तत् कुर्वतां मन्त्रिमतानुसारेण व्यवहरताम्। सर्वतः सर्वस्मात् पुत्रादप्याशङ्किनामाशङ्कमानानां दुःखाम्भोनिधिवर्तिनां कान्तासमालिङ्गनं सुखलव इति।।

अन्यदप्याह-

श्रुतं दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननं
न रत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोकपतिना।
तदर्थं धर्माथौसुतविषयसौख्यानि च ततो
गृहे लक्ष्म्यो मान्याः सततमबला मानविभवैः।।४।।

लोकपतिना प्रजापतिना स्त्रीभ्यो योषिद्भयोऽन्यत् परं द्वितीयं न क्वचिदपि रत्नं कृतम्। केवलमेव स्त्रीरत्नमित्यर्थः। स्त्रीरत्नं कीदृशम्?। श्रुतं नाममात्रेण श्रुतमप्याह्लादकरम्। दृष्टमवलोकितम्। स्पृष्ट-मवयवैकदेशेन। स्मृतं चिन्तितमपि नृणां पुंसामाह्लादजननं सुखकरम्। आह्लादं करोतीत्यर्थः। तदर्थं धर्माथौं धर्मश्चार्थश्चं तौ धर्माथौं तदर्थं क्रियेते। ततस्तस्मात् सकाशात् सुतविषयसौख्यानि भवन्ति। सुताः पुत्राः। विषयसौख्यानि इन्द्रियसौख्यानि च भवन्ति। अबलाः स्त्रियो गृहे वेश्मनि लक्ष्म्यः श्रियः। अतो मानविभवैः, मानेन पूजया, विभवेनैश्वर्येण। एतैर्बहुविधैः सततं सर्वकालं मान्याः पूज्याः।।

अन्यदप्याह-

येऽप्यङ्गनानां प्रवदन्ति दोषान् वैराग्यमार्गेण गुणान् विहाय।
ते दुर्जना मे मनसो वितर्कः सद्भाववाक्यानि न तानि तेषाम्।।५।।

ये नरा अङ्गनानां स्त्रीणां गुणान् विहाय गुणान् विद्यमानान् त्यक्तवा वैराग्यमार्गेण विरागद्वारेण दोषान् प्रवदन्ति कथयन्ति, ते दुर्जना इति मे मनसश्चित्तस्य वितर्को निश्चयः। तेषां दुर्जनानां न तानि सद्भाववाक्यानि परमार्थवचांसि भवन्ति।।

अन्यदपि प्रशंसार्थमाह-

प्रब्रूत सत्यं कतरोऽङ्गनानां दोषोऽस्ति यो नाचरितो मनुष्यैः।
धाष्टर्येन पुम्भिः प्रमदा निरस्ता गुणाधिकास्ता मनुनात्र चोक्तम्।।६।।

सोमस्तासामदाच्छौवचं गन्धर्वः शिक्षितां गिरम्।

अग्निश्च सर्वभक्षित्वं तस्मान्निष्कसमाः स्त्रियः।।७।।

ब्राह्मणाः पादतो मेध्या गावो मेध्याश्च पृष्ठतः।

अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः।।८।।

स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित्।

मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति।।९।।

स्त्रियो योषितः। अतुलमसमं परं पवित्रत्रं पावनम्। एताः स्त्रियो न कर्हिचिन्न कदाचिद् दुष्यन्ति दुष्टतां यान्ति। स्त्रीणां मासि मासि प्रतिमासं रजो रक्तं समुद्भूतं दुष्कृतानि दुष्टकर्माणि। अपकर्षति विनाशयति।।

अन्यदप्याह-

जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः।

तानि कृत्याहतानीव विनश्यन्ति समन्ततः।।१०।।

जाया वा स्याज्जनित्री वा सम्भवः स्त्रीकृतो नृणाम्।

हे कृतघ्नास्तयोर्निन्दां कुर्वतां वः कुतः शुभम्।।११।।

दम्पत्योर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः।

नरा न तमवेक्षन्ते तेनात्र वरमङ्गनाः।।१२।।

बहिर्लोम्ना तु षण्मासान् वेष्टितः खरचर्मणा।

दारातिक्रमणे भिक्षां देहीत्युक्त्वा विशुध्यति।।१३।।

दाराणामतिक्रमणं दारातिक्रमणमन्यस्त्रीनिषेवणं तस्मिन् दारातिक्रमेण बहिर्लोम्ना खरचर्मणा गर्दभत्वचा बाह्ये लोमानि कृतानि यस्मिन् तेन षण्मासान् वेष्टितः प्रावृतशरीरः प्रतिगृहं भिक्षां देहीति भिक्षां मे प्रयच्छेत्युक्त्वा सम्भाष्य ततो विशुध्यति शुद्धिमायाति।।

अन्यदपि स्त्रीप्रशंसार्थमाह-

न शतेनापि वर्षाणामपैति मदनाशयः।

तत्र शक्त्या निवर्तन्ते नरा धैर्येण योषितः।।१४।।

मदनः कामश्चेति, तस्मिन्निति। तत्र मदनाशयः कामवासनाभिः संस्कारोऽभिलाषः पुरुषाणां शतेनापि वर्षाणामब्दानां नापैति हदयान्नपसर्पति। यथा स्त्रिया सह संयोगः पूर्वमासीत् तथा साम्प्रतं यदि न भवति, तदा पुरुषाणां वर्षशतेनापि मदनाशयो नापैति, किन्तु तत्र तस्मिन् कामोपभोगविषये नराः पुरुषा अशक्त्या असामर्थ्येन निवर्तन्ते निवृत्तिं कुर्वन्ति। योषितः स्त्रियः पुनर्धैर्येण धृष्टत्वेनैनं विनिवर्तन्ते। अनेन स्त्रीणामभिलाषशीलतपाधान्यं प्रदर्शितं भवति।।

अन्यदप्याह-

अहो धाष्टर्यमसाधूनां निन्दतामनधाः स्त्रियः।
मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम्।।१५।।

पुरुषश्चटुलानि कामिनीनां कुरुते यानि रहो न तानि पश्चात्।
सुकृतज्ञतयाङ्गना गतासूनवगुह्य प्रविशन्ति सप्तजिह्नम्।।१६।।

स्त्रीरत्नभोगोऽस्ति नरस्य यस्य निः स्वोऽपि सम्प्रत्यवनीश्वरोऽसौ।
राज्यस्य सारोऽशनमङ्गनाश्च तृष्णानलोद्दीपनदारु शेषम्।।१७।।

कामिनीं प्रथमयौवनान्वितां मन्दवल्गुमृदुपीडितस्वनाम्।
उत्स्तनीं समवलम्ब्य या रतिः सा न धातृभवनेऽस्ति मे मतिः।।१८।।

कामिनीं समुद्गतमन्मथां तां व प्रथमयौवनान्वितामभिनवयौवनोपेताम्। मन्दमल्पं वल्गु रम्यं मृदु मधुरं पीडितं स्तब्धम्। शनैरालिङ्गिता सती मन्दवल्गुमृदुपीडितं स्वनं शब्दं कुर्वतीम्। उत्स्तनीमुद्गभि-द्यमानकुचाम्। एवंविधां स्त्रियं योषितं समवलम्ब्य परिष्वज्य या रतिर्भवति सुखं यादृशं संजायते सा धातृभवने प्रजापतिगृहे ब्रह्मलोके नास्ति न विद्यत इति मम मतिर्बुद्धिः। एवमहं मन्ये इति। महता क्लेशने तपसा ज्ञानेन योगादिना वा ब्रह्मलोकमासाद्य तत्र किमनुभूयते।।

इत्येतदाह-

तत्र देवमुनिसिद्धचारणैर्मान्यमानपितृसेव्यसेवनात्।
ब्रूत घातृभवनेऽस्ति किं सुखं यद्रहः समवलम्ब्य न स्त्रियम्।।१९।।

आब्रह्मकीटान्तमिदं निवद्धं पुंस्त्रीप्रयोगेण जगत् समस्तम्।
व्रीडात्र का यत्र चतुर्मुखत्वमीशोऽपि लोभाद्गमितो युवत्याः।।२०।।

इदं समस्तं निरवशेषं जगद्विश्वमाब्रह्मकीटान्तं ब्रह्मणः पितामहात् प्रभृति कीटान्तं यावत् पुंस्त्रीप्रयोगेण स्त्रीपुरुषसम्प्रयोगेण निबद्धं ग्रथितम्। स्त्रीपुंयोगादृते नान्यत् किञ्चिद् दृश्यते। अत्र जगति का व्रीडा का लज्जा पुरुषमात्रस्य यत्र नास्ति। ईशोऽपि महादेवोऽपि युवत्याः स्त्रियाश्चतुर्मुखत्वं गमितः। प्राप्तः। अत्र पौराणिकी श्रुतिः।

यथा तिलोत्तमायाः प्रदक्षिणं कुर्वाणाया अतिलावण्योपेताया उमाया उत्सङ्गस्थितायाः क्रोधभया-द्भगवता तद्रूपलाम्पट्येन तदवलोकनाय चतसृषु दिक्षु मुखचतुष्टयं सृष्टमिति।।

२१. सौभाग्यकरणाध्यायः

तत्रादावेव सुभगं पुरुषं प्रति विशेषमाह-

जात्यं मनोभवसुखं सुभगस्य सर्वमाभासमात्रमितरस्य मनोवियोगात्।

चित्तेन भावयति दूरगताऽपि यं स्त्री गर्भं बिभर्ति सदृशं पुरुषस्य तस्य ।१ ।।

सुभगस्य स्त्रीवल्लभस्य पुरुषस्य सर्वं मनोभवसुखं कामजं सुखं जात्यं श्रेष्ठम्। जात्यमुचितं सर्वं सर्वस्यां नार्याम्। यतः सुभगं पुरुषं सम्भ्योगे स्त्री निजहृदये आशास्ते, अन्यत्र मनो न नयति, ततः स्त्रीचितं तस्योपरि रज्यते। इतरस्य दुर्भगस्य मनोवियोगात् चित्तस्यान्यत्र गमनादाभासमात्रम्। अन्तरमननुप्रविश्य यद्भुज्यते तदाभासमात्रम्, न जात्यम् स्त्रीमनोवियोगा-दन्यतत्वान्मनसः। यतो वक्ष्यति-

मनो हि मूलं हरदग्धमूर्तेः।

स्त्री न सुभगं प्रति याति सा च स्त्री दूरगताऽप्यसमीपस्थाऽपि यं पुरुष चित्तेन मनसा भावयति चिन्तयति कामयते तस्य पुरुषस्य सदृशं तदाकृतिं गर्भं बिभर्तिं धारयति।।

पुरुषस्यात्मा एव स्त्रीषु पुनर्जायत इत्यतत्प्रतिपादियतुमाह-

भङ्क्त्वा काण्डं पादपस्योप्तमुर्व्यां बीजं वास्यां नान्यतामेति यद्वत्।

एवं ह्यात्मा जायते स्त्रीषु भूयः कश्चित्तस्मिन् क्षेत्रयोगाद्विशेषः।।२ ।।

पादपस्य वृक्षस्य काण्डं शाखां भङ्क्त्वा उर्व्यां भूमावुप्तं रोपितं यद्वद्यथा नान्यतामेति बीजं वा वर्षमस्यामुप्तं नान्यतामेति तदेव जायते, एवमनेन प्रकारेण स्त्रीष्वाधारभूतासु भूयः पुनरेवात्मा जायते उत्पद्यते। तस्मादात्मनि क्षेत्रयोगाद्धेतोः कश्चित् तत्क्षेत्रे विचित्रभावो भवति। यत्र क्षेत्रे बीजमुप्यते तद्वशादस्यान्यतवं वैसादृश्यं किञ्चिदृश्यं किञ्चिद्भवत्येव मातृवशात् कश्चिद्विशेषो भवति।।

दूरस्थस्य कथं कामं सम्भवतीत्येतदाह-

आत्मा सहैति मनसा मन इन्द्रियेण स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः।

योगोऽयमेव मनसः किमगम्यमस्ति यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा।।३ ।।

आत्मा कर्मात्मा चिद्रूपो मनसा चित्तेनैति सहैव गच्छति,। मनश्चेत् इन्द्रियेण सहैति। तत्रैन्द्रियाणि दश, पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि। श्रोत्रं त्वक् चक्षुर्जिह्वा नासिकेति पञ्च बुद्धीन्द्रियाणि। उक्तं च-

एवं मन इन्द्रियेण सहैति इन्द्रियं स्वार्थेनात्मीयार्थेन सहैति। यो यस्य इन्द्रियस्य विषयस्तेन सहैति गच्छति। क्रम एष शीध्रस्तात्पर्यक्रमः। अयमर्थः- आत्मा मनसा सह संयुज्यते। मनश्चेन्द्रियेण। इन्द्रियमर्थेन। अर्थ्यत इत्यर्थः। श्रोत्रादीनि बुद्धीन्द्रियाणि वागादीनि कर्मेन्द्रियाणि। अर्थाः शब्दादयः। शब्दस्पर्शरूपरसगन्धाः। अनन्तरमिन्द्रिया- स्वादिमतर्थं मन आत्मानं निवेदयति। आत्मार्थाक्रियाकारितां तस्य स्मृत्वा मनस आज्ञां ददाति कर्मेन्द्रियाण्यादाने त्यागे वा विनियुंक्ष्व इति। अनेन प्रकारेण क्रम एष शीघ्रः। क्रमः प्रक्रियैषा यस्मिन् देशे मनो व्रजति तत्रायमात्मा गतः।।

एतदेव विशेषयन्नाह-

आत्मायमात्मनि गतो हृदयेऽतिसूक्ष्मो ग्राह्योऽचलेन मनसा सतताभियोगात्।
यो यं विचिन्तयति याति च तन्मयत्वं यस्मादतः सुभगमेव गता युवत्यः।।४।।

अयमात्मा कर्मात्मा चिद्रूपो जीव आत्मनि परमात्मनि गतः स्वसत्तायां बोधरूपः स्थितः कर्ता ज्ञाता च सम्पन्नः। क्व? हृदये हृत्स्थाने। तथा च-

कीदृशः ? अतिसूक्ष्मोऽत्यन्ताल्पप्रमाणः। स च ग्राह्यो विषयीकार्योऽचलेन स्थिरेण मनसा चितेन सतताभियोगादविच्छेदाभ्यासात्। यः पुरुषो यं च वस्तुरूपं विचिन्तयति चितेन भावयति स तन्मयत्वं याति। स एव प्राकृतो यस्य त तन्मयः। यस्मादेवमतोऽस्मोद्धेतोर्युवत्यः स्त्रियः सुभगं पुरुषं प्रति गताः प्राप्ताः सतताभ्यासादिति।।

अथ सुभगदुर्भगत्वस्य लक्षणमाह-

दाक्षिण्यमेकं सुभगत्वहेतुर्विद्वेषणं तद्विपरीतचेष्टा।
मन्त्रौषधाद्यैः कुहकप्रयोगैर्भवन्ति दोषा बहवो न शर्म।।५।।

वाल्लभ्यमायाति विहाय मानं दौर्भाग्यमापादयतेऽभिमानः।
कृच्छ्रेण संसाधयतेऽभिमानी कार्याण्ययत्नेन वदन् प्रियाणि।।६।।

तेजो न तद्यत् प्रियसाहसत्वं वाक्यं न चानिष्टमसत्प्रणीतम्।
कार्यस्य गत्वान्तमनुद्धता च तेजस्विनस्ते न विकत्थना ये।।७।।

यः सार्वजन्यं सुभगत्वमिच्छेद् गुणान् सर्वस्य वदेत् परोक्षम्।
प्राप्नोति दोषानसतोऽप्यकेकान् परस्य यो दोषकथां करोति।।८।।

सर्वोपकारानुगतस्य लोकः सर्वोपकारानुगतो नरस्य।

कृत्वोपकारं द्विषतां विपत्सु या कीर्तिरल्पेन न सा शुभेन।।९।।

सर्वेषामुपकारेऽनुगतो निरतः सर्वोपकारानुगतः। तस्य सर्वोपकारानुगतस्य पुरुषस्य सर्वो निरवशेषो लोक उपकारानुगतो भवति प्रत्युपकारं करोति। द्विषतां शत्रूणां विपत्स्वापत्सूपकारमुपकृतिं कृत्वा या कीर्तिर्यशो भवति लोके साल्पेन शुभेन पुण्येन न भवति। बहुना शुभेन भवतीत्यर्थः। एवं सति सर्वस्योपकारः कर्तव्य इति तात्पर्यार्थः।।

अथ दुर्जनं प्राह-

तृणैरिवाग्निः सुतरां विवृद्धिमाच्छाद्यमानोऽपि गुणोऽ भ्युपैति।

स केवलं दुर्जनभावमेति हन्तुं गुणान् वाञ्छति यः परस्य।।१०।।

दुर्जनैः सज्जनस्य गुण आच्छाद्यमानोऽपि सुतरामतिशयेन विवृद्धिमुपैति वृद्धिं प्राप्नोति। यथा तृणेनाच्छाद्यमानोऽग्निर्विवृद्धिं याति। यः परस्य गुणान् हन्तुं विनाशयितुं वाञ्छति स केवलं दुर्जनभावं दौर्जन्यमेति प्राप्नोति , न साधोर्गुणविनाशो भवति। तस्याधिकतरा गुणाः प्रकाशमायान्ति। यथा तृणैरग्नि-श्छाद्यमानः केवलमेव तृणानि तत्र दह्यन्त इति।।

२२. कान्दर्पिकाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

रक्तेऽधिके स्त्री पुरुषस्तु शुक्रे नपुंसकं शोणितशुक्रसाम्ये।
यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि।।१।।

गर्भाधानकाले स्त्रीपुरुषयो रक्ते शोणितेऽधिके सति गर्भे स्त्री भवति। शुक्रे रेतस्यधिके पुरुषो नरो भवति। शोणितस्य रक्तस्य शुक्रस्य रेतसश्च साम्ये तुल्यत्वे नपुंसकं भवति। यस्मादेवमतोऽ-स्माद्धेतोः शुक्रविवृद्धिदानि रेतसः संवर्धनानि रसायनानि नियोगान्निषेवि-तव्यान्यभ्यवहार्याणीति।।

अथ कामस्य बन्धनरज्जुमाह-

हर्म्यपृष्ठमुडुनाथरश्मयः सोत्पलं मधु मदालसा प्रिया।
वल्लकी स्मरकथा रहः स्त्रजो वर्ग एष मदनस्य वागुरा।।२।।

हर्म्यपृष्ठं गृहपृष्ठम्। उडुनाथरश्मयश्चन्द्रकिरणाः। सोत्पलं नीलोत्पलसहिताम्। मधु मद्यम्। मद्यग्रहणमुपलक्षणार्थं शुद्रमधिकृत्यैमतदुक्तम्। ब्राह्मणादेरन्यदभिमतं पानम्। प्रिया वल्लभा। मदालसा मद्यपानेनालसा क्षीबा। वल्लकी वीणा। स्मरकथा कामकथा। रह एकान्तो निर्जनस्थानम्। सुरताभिवेशश्च। स्त्रजो मालाः। एष वर्गः समूहो मदनस्य कामस्य वागुरा बन्धनरज्जुः। अनया बध्यत इति।।

अथ शुक्रवृद्धियोगमाह-

माक्षीकधातुमधुपारदलोहचूर्णपथ्याशिलाजतृघृतानि समानि योऽद्यात्।
सैकानि विंशतिरहानि जरान्वितोऽपि सोऽशीतिकोऽपि रमयत्यबलां युवेव।।३।।

माक्षीकधातुः पाषाणमाक्षीकम्। मधु माक्षिकं क्षौद्रम्। पारदं प्रसिद्धम्। लोहचूर्णं शस्त्रचूर्णम्। पथ्या हरीतकी। शिलाजतुः प्रसिद्धः। घृतमाज्यम्। एतानि माक्षीकवर्जं सर्वाणि सममात्राणि। घृतमाक्षीकाभ्यां सममात्राभ्यां भावयित्वा गुलिका कार्या। तानि योऽद्याद् भक्षयेत्। सैकानि विंशतिरहानि सहैकेन वर्तते विंशतिः सैकविंशतिरहानि दिनानि। एकविंशतिदिनानीत्यर्थः। योऽद्यात् स जरान्वितोऽपि जरायुक्तोऽपि। अशीतिकोऽपि अशीतिवर्षोऽपि अतिवृद्धोऽपि तथाभूतोऽप्यबलां स्त्रियं युवेव तरुण इव रमयति क्रीडयति।।

अन्यदप्याह-

क्षीरं श्रृतं यः कपिकच्छुमूलैः पिबेत् क्षयं स्त्रीषु न सोभ्युपैति।

माषान् पयः सर्पिषि वा विपक्वान् षड्ग्रासमात्रांश्च पयोऽनुपानम्।।४।।

यः कामी कपिकच्छुमूलैरात्मगुप्तामूलैः सह क्षीरं दुग्धं श्रृतं क्वथितं पिबेत्, स स्त्रीषु विषये क्षयमशक्ततां नाभ्युपैति नायाति। क्षीरमेव निर्मथ्य पद्घृतमुत्पाद्यते तत् पयोधृतम्। पयः सर्पिषी पयोधृते। माषान् विपक्वान् कृत्वा षड्ग्रासमात्रान् भुक्त्वा षडेव ग्रासान् प्राश्यानुं पश्चात् पयसः क्षीरस्य पानं कार्यम्। तस्मात् पयोऽनुपानात् स स्त्रीषु क्षयं नाभ्युपैति।।४।।

अन्यदप्याह-

विदारिकायाः स्वरसेन चूर्णं मुहुर्महुर्भावितशोषितं च।

श्रृतेन दुग्धेन सशर्करेण पिबेत् स यस्य प्रमदाः प्रभूताः।।५।।

विदारिका प्रसिद्धा तस्याश्चूर्णं स्वरसेनैव विदारिकारसेनैव मुहुर्मुहुः प्रतिक्षणं भावितं सेवितं मुहुर्मुहुः शोषितं च। एतदुक्तं भवति- स्वरसेन यावत् प्रतिपालनं भावयितुमायाति तेन भावयित्वा तापे शोषयेत्। पुनः शुष्कं भावयित्वा शोषयेत्। एवं भूयो भूयः सप्त वारानित्यर्थः। तस्याश्चूर्णं यस्य प्रमदाः प्रभूताः स्त्रियो बह्वयो भवन्ति। स दुग्धेन क्षीरेण श्रृतेन क्वथितेन सशर्करेण शर्करासहितेन पिबेत्।।

अन्यदाह-

धात्रीफलानां स्वरसेन चूर्णं सुभावितं क्षौद्रसिताज्ययुक्तम्।

लीढ्वानु पीत्वां च पयोऽग्निशक्त्या कामं निकामं पुरुषो निषेवेत्।।६।।

क्षीरेण बस्ताण्डयुजा श्रृतेन सम्प्लाव्य कामी बहुशस्तिलान् यः।

सुशोषितानत्ति पयः पिबेच्च तस्याग्रतः किं चटकः करोति।।७।।

माषसूपसहितेन सर्पिषा षष्टिकौदनमदन्ति ये नराः।

क्षीरमप्यनु पिबन्ति तासु ते शर्वरीषु मदनने शेरते।।८।।

तिलाश्वगन्धाकपिकच्छुमूलैर्विदारिकाषष्टिकपिष्टयोगः।

आजेन पिष्टः पयसा घृतेन पक्वं भवेचछष्कुलिकातिवृष्या।।९।।

क्षीरेण वा गोक्षुरकोपयोगं विदारिकाकन्दकभक्षणं वा।

कुर्वन्न सीदेद् यदि जीर्यतेऽस्य मन्दाग्निता चेदिदमत्र चूर्णम्।।१०।।

क्षीरेण वा गोक्षुरकोपयोगं कुर्यात्। गोक्षुरकैः सह क्षीरं क्वाथयित्वा पिबेत्। अथवा विदारिकायाः कन्दस्य मूलस्य क्षीरेण क्वथितस्य भक्षणं कुर्यात्। एवं कुर्वन्न सीदेत् स्त्रीषु नावसादं याति। यद्यस्य कांमुमकस्य जीर्यते कामुकत्वं गच्छति तदैवम्। चेच्छब्दो यद्यर्थे। यदि मन्दाग्निताऽ-ल्पाग्नित्वं भवति, तदा तस्मिन्निदं वक्ष्यमाणं चूर्णमग्निसन्दीपनम्।।

तदाह-

साजमोदलवणा हरीतकी श्रृङ्गवेरसहिता च पिप्पली।

मद्यतक्रतरलोष्णवारिभिश्चूर्णपानमुदराग्निदीपनम्।।११।।

अत्यम्लतिक्तलवाणि कटूनि वाऽत्ति यः क्षारशाकबहुलानि च भोजनानि।

दुक्शुकवीर्यरहितः स करोत्यनेकान् व्याजान् जरन्निव युवाऽप्यबलामवाप्य।।१२।।

यः पुरुषो भोजनान्याहारानत्यम्लान्यतितिक्तानि, अतिलवणानि, अतिकटूनि वा अत्ति भक्षयति। तथा क्षारबहुलानि भोजनानि च अत्ति। द्रव्याणां संयोगं कृत्वा दग्ध्वा च क्षारं कारयेत्। तद्यथा-

एवं क्षारबहुलानि भोजनानि। तथा शाकबहूनि च योऽत्ति। अथवा क्षारशाकाः सुप्रसिद्धाः। स दृक्शुक्रवीर्यरहितः दृग् दृष्टिः, शुक्रं रेतः वीर्यं च बलम्। एतै रहितो वर्जितो भवति। अबलां स्त्रियमवाप्यं प्राप्य युवाऽपि अनेकान् व्याजान् जरन्निव वृत्तो यथा करोत्यशक्तत्वादित्यर्थः।।

२३. गन्धयुक्त्यध्यायः

अथ गन्धयुक्तिर्व्याख्यायते। तत्रादावेव च द्राव्याणां नामपरिज्ञानायास्माभिर्निघण्टुर्लिख्यते।

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

स्त्रग्गन्धधूपाम्बरभूषणाद्यं न शोभते शुक्लशिरोरुहस्य।

यस्मादतो मूर्धजरागसेवां कृर्याद् यथैवाज्जनभूषणनाम्।।१।।

शुक्लशिरोरुहस्य श्वेतकचस्य स्त्रग् माला। गन्धाः सुगन्धद्रव्याणि। धूपः सुगन्धधूपः। अम्बरं वस्त्रम्। भूषणमलङ्करणम्। आदिग्रहणादनुधूपनमिति। एवमादिकं सर्वं न शोभते, यस्मादतोऽस्माद्धे-तोर्मूर्धजानां केशानां रागे रज्जने सेवां यत्नं कुर्यात्। यथेव येन प्रकारेणाज्जने नेत्रयोर्भूषणानामलङ्क-रणादीनां सेवा क्रियते प्रत्यहं प्रयत्नतः संस्क्रियते तथैव मूर्धराजरागसेवां कुर्यादिति।।

अथ केशरंजनप्रयोगमाह-

लौहे पात्रे तण्डुलान् कोद्रवाणां शुक्ले पक्वांल्लोहचूर्णेन साकम्।

पिष्टान् सुक्ष्मं मूर्ध्नि शुक्लाम्लकेशे दत्वा तिष्ठेद् वेष्टयित्वार्द्रपत्रैः।।२।।

याते द्वितीये प्रहरे विहाय दद्यगचिछरस्यामलकप्रलेपम।

सञ्छाद्य पत्रैः प्रहरद्वयेन प्रक्षालितं कार्ष्ण्यमुपैति शीर्षम्।।३।।

लौहे पात्र इति। कोद्रवाः प्रसिद्धा। कोद्रवाणां तण्डुलान् लोहपात्रे आयसभाजने शुक्लेऽम्ले काञ्जिकादौ पक्वान् स्विन्नान् ततो लोहचूर्णेनायसचूर्णेन साकं सह पिष्टान् अतिसुक्ष्मचूर्णीकृतान् मूर्ध्नि शिरसि शुक्लाम्लकेशे शुक्लेनाम्लेन काज्जिकादिनाम्लीकृताः केशा यस्मिंस्तथाविधे मूर्धनिं तैर्लेपं कृत्वा तत आर्द्रपत्रैः सरसैर्वेष्टयित्वाऽऽच्छाद्य तिष्ठेत् प्रहरद्वयं यावत्।

याते द्वितीयं इति। ततो द्वितीये प्रहरे यातेऽतिक्रान्ते तल्लेपं विहाय त्यक्त्वा ततः शिरसि मूर्ध्नि आमलकैः प्रलेपं दद्यात्। पत्रैश्च सरसैः सच्छाद्य तिष्ठेदन्येन् प्रहरद्वयेन तल्लेपं त्यक्त्वा शीर्षं प्रक्षालयेत्। प्रक्षालितं कार्ष्ण्यं कृष्णत्वमुपैति गच्छति।।

ततः किं कुर्यादित्याह-

पश्चाच्छिरः स्नानसुगन्धतैलैर्लोहाम्लगन्धं शिरसोसऽपनीय।

हृद्यैश्च गन्धैर्विविधैश्च धूपैरन्तः पुरे राज्यसुखं निषेवेत्।।४।।

पश्चादनन्तरं शिरः स्नानैः सुगन्धैश्च तैलैर्लोहगन्धमम्लगन्धं च शिरसो मूर्ध्नोऽपनीयापास्य ततो हृद्यैश्च गन्धैर्हृदयस्य प्रिय हृद्यंध चित्ताह्लादकम्। हृद्यैर्गन्धैः सुगन्धद्रव्यैस्तुष्टजननैर्विविद्यैश्च धूपैः सहान्तः पुरे राज्यस्य सुखं निषेवेत् स्वमहिषीभिः क्रीडां कुर्यादित्यर्थः।

अत्र द्रव्याणां सर्वेषां प्रायः काञ्जिकेन क्षालनं निर्मलेन केषाञ्चिज्जलेन केषाञ्चिद् गोमूत्रेण नखतिलतैलेनायसभाण्डे पचेत्। मृद्वग्निना पाकवेधगन्धधूपनानि लोकतो ज्ञेयानि। आचार्येण नोक्तानि। अस्माभिर्ग्रन्थविस्तरभयान्न प्रदर्शितानि। यतः सकलसंहितास्माभिर्व्याख्या-तुमारब्धा केवलमत्राक्षरणां व्याख्या क्रियते, न चास्माकमत्र तथाविधं प्रावीण्यम्। अतस्तज्ज्ञैर्लोकव्यवहारतः कार्यः प्रयोगानिचयः।।

तत्रादावेव शिरःस्नानमाह-

त्वक्कुष्ठरेणुनलिकास्पृक्कारसतगरबालकैस्तुल्यैः।

केसरपत्रविमिश्रैर्नरपतियोग्यं शिरः स्नानम्।।५।।

त्वक् प्रसिद्धा। कुष्ठः प्रसिद्ध एव। रेणुर्हरेणुका। नलिका प्रवालवल्ली। स्पृक्का प्रसिद्धा लता। रसो बोलः। तगरः प्रसिद्धाः। बालकं ह्वीबेरम्। एतैस्तुल्यैः समभागैः। किं भूतैः ? केसरपत्रविमिश्रैः, केसरं नागकेसरम्। पत्रं गन्धपत्रं त्वगादिभिः केसरपत्रैर्विमिश्रितैः शिरःस्नानं नरपतियोग्यं राजोपयोग्यं भवति।।

अथ सुगन्धतैलमाह-

मञ्जिष्ठया व्याघ्रनखेन शुक्त्या त्वचा सकुष्ठेन रसेन चूर्णः।

तैलेन युक्तोऽर्कमयूखतप्तः करोति तच्चम्पकगन्धि तैलम्।।६।।

मञ्जिष्ठा प्रसिद्धा। तथा व्याघ्रनखेन व्याध्रनखः समुद्रफेनः तेन। तथा शुक्त्या नखेन। नखं शङ्खोद्भवं चर्म। त्वक् प्रसिद्धा। तया त्वचा। तथा सकुष्ठेन रसेन। कुष्ठं प्रसिद्धम्। रसो बोलः। कुष्ठसहितेन रसेन बोलेन सह चूर्णः कार्यः। सर्वैरेतैर्यथोक्तैः समभागकैः स चूर्णः कार्यः। तैलेन तिलतैलने युक्तः। अर्कमयूखतप्तः, अर्कमयूखै रविकिरणैः सन्तप्तोऽतीव तापितः। तत् तैलं चम्पकगन्धि चम्पकपुष्पसमसुरभिं सुगन्धिं करोति।।

अथ गन्धचतुष्टमाह-

तुल्यैः पत्रतुरुष्कबालगरैर्गन्धः स्मरोद्दीपनः

सव्यामो बकुलोऽयमेव कटुकाहिङ्गुप्रधूपान्वितः।

कुष्ठेनोत्पलगन्धिकः समलयः पूर्वो भवेच्चम्पको

जातीत्वक्सहितोऽतिमुक्तक इति ज्ञेयः सकुस्तुम्बुरु :।।७।।

शतपुष्पाकुन्दुरुकौ पादैनार्धेन नखतुरुष्कौ च।

मलयप्रियङ्गुभागी गन्धो धूप्यो गुडनखेन।।८।।

गुग्गुलुबालकलाक्षामुस्तानखशर्कराः क्रमाद् धूपः।

अन्यो मांसीबालकतुरुष्कनखचन्दनैः पिण्डः।।९।।

गुग्गुलः प्रसिद्धः। बालकः प्रसिद्ध एव। लाक्षा प्रसिद्धा। मुस्ता प्रसिद्धैव। नखं शङ्खोद्भवं चर्म प्रसिद्धमेव। शर्करा प्रसिद्दा। एते क्रमात् समभागयोजिता धूपो भवति। अन्य इति। मांसी प्रसिद्धा। बालकं प्रसिद्धम्। तुरुष्कं सिह्लरसम्। नखचन्दनं च प्रसिद्धमेव। एतैः समभागैरन्यो द्वितीयः पिण्डः पिण्डधूपो भवति।।

अन्यदप्याह-

हरीतकीशङ्खघनद्रवाम्बुभिर्गुडोत्पलैः शैलकमुस्तकान्वितैः।

नवान्तपादादिविवर्धितैः क्रमाद् भवन्ति धूपा बहवो मनोहराः।।१०।।

भागैश्चतुर्भिः सितशैलमुस्ताः श्रीसर्जभागौ नखगुग्गुलू च।

कर्पूरबोधो मधुपिण्डितोऽयं कोपच्छदो नाम नरेन्द्रधूपः।।११।।

त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन संयुतैश्चूर्णः।

पुटवासः प्रवरोऽयं मृगकर्पूरप्रबोधेन।।१२।।

घनबालकशैलेयककर्पूरोशीरनागपुष्पाणि।

व्याघ्रनखस्पृक्कागुरुदमनकनखतगरधान्यानि।।१३।।

कपूरचोलमलयैः स्वेच्छापरिवर्तितैश्चतुर्भिरतः।

एकद्वित्रिचतुर्भिर्भागैर्गन्धार्णवो भवति।।१४।।

घ	बा	शै	क
उ	ना	व्या	स्पृ
अ	द	न	त
धा	क	चो	म

अत्रैव विशेषमाह-

अत्युल्बणगन्धत्वादेकांशो नित्यमेव धान्यानाम्।

कर्पूरस्य तदूनो नैतौ द्वित्र्यादिभिर्देयौ।।१५।।

अत्र धान्यानां धान्यकाफलानामत्युल्बणगन्धत्वादुत्कटत्वान्नित्यं सर्वकालमेकांश एको भागो दातव्यः। कर्पूरस्योल्बणगन्धत्वात् तदूनः तस्माद् भागादप्यूनो दातव्यः। एतौ द्वौ द्वित्र्यादिभिर्भागैः प्राप्तावपि न देयौ न दातव्यौ। यतस्तदुत्कटत्वादन्यद्रव्याणां गन्धहानिर्भवति।।

अथैतेषां धूपानां बोधनं चाह-

श्रीसर्जगुडनखैस्ते धूपयितव्याः क्रमान्न पिण्डस्थैः।

बोधः कस्तूरिकया देयः कर्पूरसंयुतया।।१६।।

श्रीः श्रीवासकः। सर्जः सर्जरसः गुडनखे प्रसिद्धे। एतेः क्रमाते सर्व एव गन्धा धूपयितव्याः। न पिण्डस्थैर्न मिश्रीकृतैः। एतदुक्तं भवति- प्रथमतः सर्व एव श्रीवासकेन धूपयितव्याः। तथाभूताः। पुनः सर्जरसेन। ततः सर्व पुनरपि गुडेन। ततः सर्वे नखेन धूपयितव्याः। ततः सर्वेषां कस्तूरिकया कर्पूरसंयुतया बोधः कार्यः। एवं कृते शोभनासते गन्धा भवन्ति।।

अथात्र सर्वगन्धानां व्यापकत्वेन प्रदर्शनार्थमाह-

अत्र सहस्त्रचतुष्टयमन्यानि च सप्ततिसहस्त्राणि।

लक्षं शतानि सप्त विंशतियुक्तानि गन्धानाम्।।१७।।

अत्रास्मिन् द्रव्यगणे गन्धानां सहस्त्रचतुष्टयमन्यानि च सच्पतिसहस्त्राणि लक्षमेकं सप्तशतानि विंशत्यधिकानि गन्धानामन्तर्भवन्तीत्यर्थः।।

अत्रैकैकं षड्गन्धकरं भवतीत्याह-

एकैकमेकभागं द्वित्रिचतुर्भागिकैर्युतं द्रव्यैः।

षड्ंगन्धकरं तद्वद्द्वित्रिचतुर्भागिकं कुरुते।।१८।।

एकैकं द्रव्यं यच्च एकभागिकं तदपि द्वित्रिचतुर्भागिकैर्द्रव्यैर्युतं संयुक्त षड्गन्धकरं षड्गन्धान् करोति। तद्वतेनैव प्रकारेण द्वित्रिचतुर्भागिकं कुरुते। यानि द्रव्याण्यनयान्येकभागिकेऽन्यस्मिन् द्वित्रि-चतुर्भागिकानि दत्तानि तान्यपि तेन सह प्राग्वद् भागपरिकल्पनया षड्गन्धकराणि भवन्ति। एवं प्रत्येकं द्रव्यमेकभागिकमनयैर्द्वित्रि-चतुर्भागिकैर्युक्तं षड्गन्धकरं भवति।।

अथ सर्वेषां सङ्ख्याज्ञानमाह-

द्रव्यचतुष्टययोगाद् गन्धचतुर्विंशतिर्यश्चैकस्य।
एवं शेषाणामपि षण्णवतिः सर्वपिण्डोऽत्र।।१९।।

षोडशके द्रव्यगणे चतुर्विकल्पेन भिद्यमानानाम्।

अष्टादश जायन्ते शतानि सहितानि विंशत्या।।२०।।

अस्मिन् द्रव्यगणे षोडशके षोडशसङ्ख्ये चतुर्विकल्पेन चतुर्भिश्चतुर्भिर्द्रव्यैरेकैको गन्ध इत्यनेन क्रमेण भिद्यमानानामष्टादश शतानि। विंशत्यधिकानि गन्धानां जायन्ते उत्पद्यन्ते। एतत्पुरस्तादाचार्य एव प्रदर्शयिष्यति।।

अथ सर्वगन्धानां संख्याप्रमाणज्ञानमाह-

षण्णवतिभेदाभ्निश्चतुर्विकलल्पो गणो यतस्तस्मात्।

षण्णवतिगुणः कार्यः सा सङ्ख्या भवति गन्धानाम्।।२१।।

पूर्वेण पूर्वेण गतेन युक्तं स्थानं विनान्त्यं प्रवदन्तिं सङ्ख्याम।

इच्छाविकल्पैः क्रमशोऽभिनोय नीते निवृत्तिः पुनरन्यनीतिः।।२२।।

द्वित्रीन्द्रियाष्टभागैरगुरुः पत्रं तुरुष्कशैलेयौ।

विषयाष्टपक्षदहनाः प्रियङ्गुमुस्तारसाः केशः।।२३।।

स्पृक्कात्वक्तगराणां मांस्याश्च कृतैकसप्तषड्भागाः।

सप्तर्तुवेदचन्द्रैर्मलयनखश्रीककुन्दुरुकाः।।२४।।

अ २	प ३	तु ५	शै ८
प्रि ५	मु ८	र २	के ३
स्पृ ४	त्व १	त ७	मां ६
म ७	न ६	श्री ४	कु १

एवं न्यासे प्रदर्शिते प्रयोजनमाह-

षोडशके कच्छपुटे यथा तथा मिश्रिते चतुर्द्रव्ये।

येऽत्राष्टादश भागास्तेऽस्मिन् गन्धादयो योगाः।।२५।।

नखतगरतुरुष्कयुता जातीकर्पूरमृगकृतोद्बोधाः।

गुडनखधूप्या गन्धाः कर्तव्याः सर्वतोभद्राः।।२६।।

जातीफलमृगकर्पूरबोधितैः ससहकारमधुसिक्तैः।

बहवोऽत्र पारिजाताश्चतुर्भिरिचछापरिगृहीतैः।।२७।।

चतुर्भिर्मध्यैरिच्छापरिगृहीतैः स्वेच्छया गन्धानि द्रव्याणि सङ्गृहीतैः। जातीफलमृगकर्पुरबोधितैः, जातीफलं प्रसिद्धम्। मृगः कस्तूरिका। कर्पूरः प्रसिद्धः। एतैबोधितैः ससहकारमधुसिक्तैः सहकारेण चूरससंयुक्तेन मधुना माक्षिकेण सिक्थकैरत्रास्मिन् कच्छपुटे बहवः पारिजाताः पारिजातसदृशगन्धा मुखवासा भवन्ति।।

अथाधुना स्नानान्याह-

सर्जरसश्रीवासकसमन्विता येऽत्र सर्वधूपास्तैः।

श्रीसर्जरसवियुक्तैः स्नानानि सबालकत्वग्भिः।।२८।।

अत्रास्मिन् कच्यपुटे ये ये धूपाः सर्जरसश्रीवासकसमन्वितास्ते सर्व एव निःशेषाः। तैरेव सर्वैः प्रागुक्तैः श्रीसर्जरसवियुक्तैः। श्रीवासकेन रहितैः सबालकत्वग्भिः, बालकं ह्रीवेरम्। त्वक् प्रसिद्धा। सबालकत्वग्भिर्बालकत्वक्सहितैः स्नानानि स्थानीयानि चूर्णानि भवन्ति।।

अधुना चुरशीतिकेसरगन्धानाह-

रोध्रोशीरनतागुरुमुस्तापत्रप्रियङ्गुवनपथ्याः।

नवकोष्ठात् कच्छपुटाद् द्रव्यत्रितयं समुद्धृत्य।।२९।।

चन्दनतुरुष्कभागौ शुक्त्यर्धं पादिका तु शतपुष्पा।

कटुहिङ्गुलगुडधूप्याः केसरगन्धाश्चतुरशीतिः।।३०।।

सप्ताहं गोमूत्रे हरीतकीचूर्णसंयुते क्षिप्त्वा।

गन्धोदके च भूयो विनिपक्षेद् दन्तकाष्टानि।।३१।।

एलात्वक्पत्राञ्जनमधुमरिचैर्नागपुष्पकुष्ठैश्च।

गन्धाम्भः कर्तव्यं कञ्चित् कृतयमैकशिखिभागैः।

अवचूर्णितानि भानोर्मरीचिभिः शोषणीयानि।।३३।।

वर्णप्रसादं वदनस्य कान्तिं वैशद्यमास्यस्य सुगन्धितां च।

संसेवितुः श्रोत्रसुखां च वाचं कुर्वन्ति काष्ठान्यसकृद्भवानाम्।।३४।।

असकृद्वारद्वयं भवतीत्यसकृद्भवा दन्तास्तेषां काष्ठानि दन्तकाष्ठानीत्यर्थः। संसेवितुर्वर्णप्रसादं वर्णस्य प्रसन्नतां सुकान्तमित्यर्थः। वदनस्य मुखस्य कान्तिं कमनीयताम्। आस्यस्य मुखस्य वैशद्यं निर्मलत्वं शुद्धताम्। सुगन्धितां सौगन्ध्यम्। श्रोत्रसुखां कर्णसुखप्रदां वाचं गिरं कुर्वन्ति।।

अथ ताम्बूलगुणानाह-

कामं प्रदीपयति रूपमभिव्यनक्ति सौभाग्यमावहति वक्त्रसुगन्धितां च।

ऊर्जं करोति कफजांश्च निहन्ति रोगांस्ताम्बूलमेवमपरांश्च गुणान् करोति।।३५।।

वर्णप्रसादं वदनस्य कान्तिमित्येतान् गुणांस्ताम्बूलस्य स्थितानेव इमानपरानन्यान्। तद्यथा- कामं मन्मथं प्रदीपयति उत्पादयति। रूपं शरीरशोभामभिव्यनक्ति उत्पादयति। सौभाग्यं वल्लभत्वमा-वहति करोति। वक्त्रस्य मुखस्य सुगन्धितां सौगन्ध्यं करोति। ऊर्जं बलं करोति। कफजान् कफोत्थान् रोगान् निहन्ति नाशयति। तथाऽपरान् कण्ठशुद्धिमात्रपरिणाममलक्षयांश्च करोति।।

अन्यानप्याह-

युक्तेन चूर्णेन करोति रागं रागक्षयं पूगफलातिरिक्तम्।

चूर्णाधिरकं वक्त्रविगन्धकारि पत्राधिकं साधु करोति गन्धम्।।३६।।

पत्राधिकं निशि हितं सफलं दिवा च प्रोक्तान्यथाकरणमस्य विडम्बनैव।

कक्कोलपूगलवलीफलपारिजातैरामोदितं मदमुदा मुदितं करोति।।३७।।

निशि रात्रौ ताम्बूलं पत्राधिकं हितम्। दिवा च दिवसे सफलं पूगफलाधिकम्। अस्य ताम्बूलस्य प्रोक्तान्यथाकरणमुक्ताद्विपरीकरणम्। यथा निशि फलाधिकं दिवसे पत्राधिकं विडम्बनैषो-पहासः। कक्कोलं प्रसिद्धम्। पूगफलानि प्रसिद्धानि। लवलीफलं लवङ्गपुष्पम्, तस्य फलासम्भवात्। पारिजातं जातीफलम्। एतैरामोदितं युक्तं ताम्बूलं मदमुदा मदहर्षेण मदितं हृष्टं नरं करोति।।

२४. स्त्रीपुंससमायोगाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

शस्त्रेण वेणीविनिगूहितेन विदूरथं स्वा माहिषी जघान।

विषप्रदिग्धेन च नूपुरेण देवी विरक्तं किल काशिराजम्।।११।।

एवं विरक्ता जनयन्ति दोषान् प्राणच्छिदोऽन्यैरनुकीर्तितैः किम्।

रक्ता विरक्ताः पुरुषैरतोऽर्थात् परीक्षितव्याः प्रमदाः प्रयत्नात्।।२।।

शस्त्रेणेति। विदूरथं राजानं स्वा महिषी आत्मीया भार्या विरक्त वेणीविनिगूहितेन केशकलाप-प्रच्छादितेन शस्त्रेणायुधेन विनिगूढेन जघान हतवती। किलेत्यागमसूचने। काशिराजं देवी स्वभार्या विषप्रदिग्धेन विषलिप्ते नूपुरेण मञ्जीरेण जघान। तद्विषं पानादिषु क्षिप्त्वेत्यर्थः।

एवमिति। एवमनेन प्रकारेण विरक्ताः स्त्रियः प्राणिच्छदः प्राणान्तिकान् दोषान् जनयन्ति उत्पादयन्ति। किमन्यैरपरैर्दोषैरनुकीर्तितैः कथितैः प्रयोजनम्। अतोऽस्मादेतस्मात् कारणात् पुरुषैर्नरेन्द्रैः प्रमदाः स्त्रियः प्रयत्नात् सर्वथा रक्त विरक्ताः परीक्षितव्या विचार्याः। तथा च कामन्दकिः -

अथानुरक्ताया लक्षणमाह-

स्नेहं मनोभवकृतं कथयन्ति भावा नामीभुजस्तनविभूषणदर्शनानि।

वस्त्राभिसंयमनकेशविमोक्षणानि भ्रूक्षेपकम्पितकटाक्षिनिरीक्षणानि।।३।।

अन्तरावस्थासूचकोश्चेष्टाविशेषा भावाः। शरीरकम्पो मुखशोषः पाण्डुवक्त्रता चेत्यादिकाः। मनोभवकृतं कामजनितं स्नेहं प्रीतिं कथयन्ति व्यञ्जयन्ति। तथा नामीभुजस्यतनविभूषणदर्शनानि मनोभवकृतं स्नेहं कथयन्ति। नाभी उदरमध्यम्। भुजौ बाहू। स्तनौ कुचौ। भूषणान्यलङ्करणानि। एतेषां दर्शनानि। वल्ल्भं दृष्ट्वा अनुरक्ता स्त्री एतानि प्रकटीकरोति। तथा वस्त्राणामम्बराणामभिसंयमनं नियमनम्। केशानां केशवेण्या विमोक्षणं मुञ्जनम्। एतान्यपि मनोभवकृतं स्नेहं कथयन्ति। तथा भ्रूषेपकम्पितटकाक्षनिरीक्षणानि मनोभवकृतं स्नेहं कथयन्ति। कटाक्षो नयनविभ्रमः। भ्रूविक्षेपेण भ्रूचालनेन यः कम्पश्चालनं तेन यत्कटाक्षनिरीक्षणम्, तानि भ्रूक्षेप कम्पितकटाक्षनिरीक्षणान्यपि। तथा च कश्यपः- **बृ.सं., पृ-३२७**

अथान्यदपि रक्तालक्षणमाह-

उच्चैः ष्ठीवनमुत्कटत्रहसितं शय्यासनोत्सर्पणं

गात्रास्फोटनजृम्भणानि सुलभद्रव्याल्पसम्प्रार्थना।

बालालिङ्गनचुम्बनानाभिमुखे सख्याः समालोकनं

दृक्पातश्च पराङ्मुखे गुणकथा कर्णस्य कण्डूयनम्।।४।।

तन्मित्रपूजा तदरिद्विषत्वं कृतस्मृतिः प्रोषितदौर्मनस्यम्।

स्तनौष्ठदानोन्युपगूहनं च स्वेदोऽथ चुम्बाप्रथमाभियोगः।।५, ६।।

विरक्तचेष्टा भ्रुकुटीमुखत्वं पराङ्मुखत्वं कृतविस्मृतिश्च।

असम्भ्रमो दुष्परितोषता च तद्द्विष्टमैत्री परुषं च वाक्यम्।।७।।

स्पृष्टाथवालोक्य धुनोति गात्रं करोति गर्व न रुणद्धि यान्तम्।

चुम्बाविरामे वदनं प्रमार्ष्टि पश्चात्समुत्तिष्ठति पूर्वसुप्ता।।८।।

विरक्तचेष्टा विरागचेष्टा यस्यास्तस्या इदं लक्षणम्। भ्रुकुटीमुखत्वं दूरस्थं पतिं दृष्ट्वा मुखे भ्रुकुटिविकृतिं करोति। पराङ्मुखत्वं तदवलोकनादन्यप्रेक्षणम्। कृतविस्मृतिः तेन यत्कृतमुपकारादिकं तस्य विस्मृतिर्विस्मरणम्। दर्शनासम्भ्रमोऽनादरः। दुष्परितोषता दुःखेन परितोषः। प्रभूतार्थदानेनापि परितुष्टा न भवति। तद्द्विष्टेन तच्छत्रुणा सह मैत्री प्रीतिः सुहृद्भावः। वाक्यं वचनं परुषमनभिमतं ब्रवीति जल्पति।

स्पृष्टाऽथवेति। अथवा तत्पुरुषं स्पृष्ट्वा विलोक्य संवीक्ष्यं गात्रं शरीरं धुनोति चालयति। गर्वं माहात्म्यं च करोति। तं प्रतिकुपितं यान्तं गच्छन्तं न रुणद्धि न रोधयति। चुम्बाविरामे वक्त्रसंयोगान्ते वदनमास्यं प्रमार्ष्टि प्रमार्जयति। पूर्वसुप्ता प्रथममेव शयने सुप्ता पश्चादनन्तरं पुरुषे समुत्थिते समुत्तिष्ठाति। तथा च कश्यपः- **बृ.सं., पृ-३२९**

अथैतासां कुलजनविनाशायैतो दूत्यो भवन्ति ताभ्यः संरक्षणीया इत्याह-

कुलजनविनाशहेतुर्दूत्यो यस्मादतः प्रयत्नेन।

ताभ्यः स्त्रियोऽभिरक्ष्या वंशयशोमानवृद्ध्यर्थम्।।९, १०।।

रात्रीविहारजागररोगव्यपदेशपरगृहेक्षणिकाः।

व्यसनोत्सवाश्च सङ्केतहेतवस्तेषु रक्ष्याश्च।।११।।

आदौ नेच्छति नोज्झति स्मरकथां व्रीडाविमिश्रालसा

मध्ये ह्रीपरिवर्जिताभ्युपरमे लज्जाविनम्रानना।
भावैर्नैकविधैः करोत्यभिनयं भूयश्च या सादरा
बुद्ध्वा पुंप्रकृतिं च यानुचरति ग्लानेतरैश्चेष्टितैः।। १२।।

स्त्रीणां गुणा यौवनरूपवेषदाक्षिण्यविज्ञानविलासपूर्वाः।
स्त्री रत्नसंज्ञा च गुणान्वितासु स्त्रीव्याधयोऽन्याश्चतुरस्य पुंसः।।१३।।

न ग्राम्यवर्णैर्मलदिग्धकाया निन्द्याङ्गसम्बन्किथां च कुर्यात्।
न चान्यकार्यस्मरणं रहःस्था मनो हि मूलं हरदग्धमूर्तेः।।१४।।

ग्रामे भवा ग्राम्याः, ग्राम्यैर्वर्णैर्मलैर्दिग्धा उपलक्षिताः काया यासाम्। प्राकृतभाषिण्य इत्यर्थः। ताभिः स्त्रीभिः सह निन्द्याङ्गसम्बन्धिकथा मैथुनीं कथां न कुर्यात्। रहःस्था सुरतासन्ना अन्यकार्याणां गृहाश्रितानां कर्मणां चिन्तनं न कुर्यात्। यतो हरदग्धमूर्तेः कामस्य मनश्चित्तं मूलं तस्मिन्नन्यत्र गते कामजं सुखं नोत्पद्यते। यतः प्रथमत एवोक्तम्- जात्यं मनोभवसुखं सुभगस्य सर्वमाभासमात्रमितरस्य मनोवियोगात्।।१४।।

अन्यानपि स्त्रीगुणानाह-

श्वासं मनुष्येण समं त्यजन्ती बाहूपधानस्तनदानदक्षा।
सुगन्धकेशा सुसमीपरागा सुप्तेऽनुसुप्ता प्रथमं विबुद्धा।।१५।।

मनुष्येण पुरुषेण समं तुल्यकालं श्वासं समुच्छवासं त्यजन्ती। अनेन परस्परं राग उक्तः। बाहूपधानस्तनदानदक्षा बाह्वोरूपधानं बाहूपधानम्, बाहूपधाने स्तनस्पर्शकरणे च दक्षा चतुरा। सुगन्धकेशा सुगन्धीकृताः केशा यया च। सुसमीपरामा शोभनं समीपे निकटे रागोऽनुरागो यस्याः। सुरतारम्भ एव जायते रागो यस्या इत्यर्थः। तस्मिन् कान्ते सुप्ते पश्चात्सुप्ता, प्रथममादौ विबुद्धा विगतनिद्रा भवति। तथा च काश्यपः- **बृ.सं., पृ-३३३**

अथ वर्ज्याः स्त्रीराह-

मांसानि यस्याश्च चलन्ति नार्या महोदरा खिक्सिमिनी चू या स्यात्।
स्त्रीलक्षणे या कथिताश्च पापास्ताभिर्न कुर्यात्सह कामधर्मम्।।१६, १७, १८।।

यच्छब्दवेदनावर्जितं त्र्यहात् संनिवर्त्तते रक्तम्।
तत्पुरुषसम्प्रयोगादिविचारं गर्भतां याति।।१९, २०।।

पुष्यस्नानौषधयो या कथितास्ताभिरम्बुमिश्राभिः।

स्नायात्तथात्र मन्त्रः स एव यस्तत्र निर्दिष्टः।।२१ २२।।

युग्मासु किल मनुष्या निशासु नार्यो भवन्ति विषमासु।
दीर्घायुषः सुरूपाः सुखिनश्च विकृष्टयुग्मासु।।२३।।

दक्षिणपार्श्वे पुरुषो वामे नारी यमावुभयसंस्थौ।
यदुदरमध्योपगतं नपुंसकं तन्निबोद्धव्यम्।।२४।।

यो गर्भः स्त्रिया दक्षिणपार्श्वे स्थितो भवति स पुरुषो ज्ञेयः यश्च वामपार्श्वे नारी स्त्री ज्ञेयाफ, उभयसंस्थौ वामदक्षिणपार्श्वस्थौ यमौ द्वौ गर्भौ ज्ञेयौ यद्गर्भमुरमध्योपगतं मध्यादेव न चलति तन्नपुंस-कमिति निबोद्धव्यं ज्ञातव्यमं।।

अथ स्त्रीसम्प्रयोगकाले शुभयोगमाह-

केन्द्रत्रिकोणेषु शुभस्थितेषु लग्ने शशाङ्को च शुभौ समेते।
पापैस्त्रिलाभारिगतैश्च यायात्पुंजन्मयोगेषु च सम्प्रयोगम्।।२५।।

न नखदशनविक्षतानि कुर्यादृतुसमये पुरुषः स्त्रियाः कथञ्चित्।
ऋतुरपि दश षट् च वासराणि प्रथमनिशात्रितयं न तत्र गम्यम्।।२६।।

पुरुषो नरः स्त्रिया योषित ऋतुसमये गर्भाधानसमये कथञ्चित् कथमपि नखदशनविक्षतानि न कुर्यात् कारयेत्। अपिशब्दश्चार्थे। ऋतू रजः। दश षट् च षोडशवासराणि षोडशदिनानि भवन्ति। तत्र ऋतौ सति प्रथममादौ निशात्रितयं रात्रित्रितयं न गम्यम्। यतस्त्रतत्रं गर्भः स्त्रव तीति।।

२५. शय्यालक्षणाध्यायः

तत्रादावेव तदारम्भप्रदर्शनार्थमाह-

सर्वस्य सर्वकालं यस्मादुयोगमेति शास्त्रमिदम्।
राज्ञां विशेषतोऽतः शयनासनलक्षणं वक्ष्ये।।१।।

यस्माद्यतं इदं शास्त्रं शयनासनलक्षणाख्यं सर्वजनस्य सर्वकालमुपयोगमेति गच्छति, विशेषतो नृपाणामुपयोगमेति। अतोऽस्माच्छयनासनलक्षणं वक्ष्ये कथयिष्ये।।

तत्रादौ नृपाणामासनलक्षणमाह-

असनस्पन्दनचन्दनहरिद्रसुरदारुतिन्दुकीशालाः।
काश्मर्यञ्जनपम्कशाका वा शिंशपा च शुभाः।।२।।

असनम्। स्पन्दनम्। चन्दनं मलयजम्। हरिद्रः सुरदारुर्देवदारुः। तिन्दुकी। शालः। एते सर्व एव वृक्षविशेषाः। काश्मरी। अञ्जनं शोभाञ्जनम्। पद्मकः। शाकः। शिंशपा च - एते वृक्षाः। सर्व एव शयने शय्यायामासने च शुभाः शुभदाः।।

अथाशुभवृक्षानाह-

अशनिजलानिहस्तिप्रपातिता मधुविहङ्गकृतनिलयाः।
चैत्यश्मशानपथिजोर्ध्वशुष्कवल्लीनिबद्धाश्च।।३।।

अशनिर्विद्युत्। जलं पानीयम्। अनिलो वायुः। हस्ती करी- एभिर्ये वृक्षाः प्रपातिताः प्रपीडियाः। वा मधुविहङ्गकृतनिलयाः, मधुभिर्मक्षिकाभिः, विहङ्गैश्च पक्षिभिः, कृता निलया निवासस्थानानि येषाम्। चैत्यः प्रधानवृक्षः। श्मशानजः पितृवनजातः। पथिजः। मार्गजातः। ऊर्ध्वशुष्कः स्थानस्थ एवोपरि भागे शुष्को नीरसो जातः। वल्लीभिर्निबद्ध। एते सर्व एवाशुभा।।

अन्यदप्याह-

कण्टकिनो ये च स्युर्महानदीसङ्गमोद्भवा ये च।
सुरभवनजाश्च न शुभा ये चापरयाम्यदिक्पतिताः।।४।।

कण्टकिन इति। ये च कण्टकिनः सकण्टकाः स्युर्भवेयुः। ये च महानदीसङ्गमोद्भवाः, महानद्यः प्रधानसरितः सङ्गमः संयोगो यत्र तत्र येषामुद्भव उत्पतिः। तथा ये च सुरभवनजाता देववेश्मनि जाताः, ते सर्व एव वृक्षा न शुभाः। ये चाऽपरस्यां पश्चिमायां दक्षिणस्यां दिशि पतितास्वेऽपि न शुभाः।।

अथाप्रशस्तवृक्षरचितस्य शयनासनस्य फलमनिष्टमाह-

प्रतिषिद्धवृक्षनिर्मितशयनासनसेवनात् कुलविनाशः।

व्याधिभयव्ययकलहा भवन्त्यनर्था अनेकविधाः।।५।।

प्रतिषिद्धेनाप्रशस्तेन वृक्षेण तरुणा यन्निर्मितं कृतं शयनमासनं वा तस्य सेवनात् कुलविनाशो वंशक्षयो भवति, तथा व्याधिः पीडा, भयं भीतिः व्ययमर्थहानिः, कलहोऽप्रीतिः- एते भवन्ति। अनेकविधा अनेकप्रकाराश्चानर्था अनर्थकृतयो भवन्ति सन्ति।।५।।

अथ प्राक्छिन्नस्य दारुणः परीक्षणवशेन फलमाह-

पूर्वच्छिन्नं यदि वा दारु भवेत्तत्परीक्ष्यमारम्भे।

यद्यारोहेत्तस्मिन् कुमारकः पुत्रपशुदं तत्।।६।।

यदि वा कदाचिद्दारु काष्ठं पूर्वच्छिन्नं प्राक्कल्पितं भवेत् स्यात् तदा तद्दार्वारम्भे प्रारम्भकाले परीक्ष्य विचार्यम्। अशनिजलं इत्यादिनोक्तलक्षणेन तस्मिन् पूर्वच्छिन्ने दारुणि यदि कश्चित् कुमारको बालक आगत्याऽऽरोहेदुपर्युपविशति, तदा तत्कृतं शयनासनं पुत्रपशुदं भवति। पुत्रान् सुतान् पशूंश्चतु-ष्पदान् ददाति।।

अथारम्भकाले शुभचिह्नान्याह-

सितकुसुममत्तवारणदध्यक्षतपूर्णकुम्भरत्नानि।

मङ्गल्यान्यन्यानि च दृष्ट्वारम्भे शुभ ज्ञेयम्।।७।।

कर्माङ्गुलं यवाष्टकमुदरासक्तं तुषैः परित्यक्तम्।

अङ्गुलशतं नृपाणां महती शय्या जयाया कृता।।८।।

नवतिः सैव षडूना द्वादशहीना त्रिषट्कहीना च।

नृपपुत्रमन्त्रिबलपतिपुरोधसां स्युर्यथासङ्ख्यम्।।९।।

अर्धमतोऽष्टांशोनं विष्कम्भो विश्वकर्मणा प्रोक्तः।

आयामत्र्यंशसमः पादोच्छ्रायः सकुक्ष्यशिराः।।१०।।

यः सर्वः श्रीपर्ण्या पर्यङ्को निर्मितः स धनदाताः।

असनकृतो रोगहरस्तिन्दुकसारेण वित्तकरः।।११।।

केयलचन्दनरचितं काञ्चनगुप्तं विचित्ररत्नयुतम्।

अध्यासन् पर्यङ्कं विबुधैरपि पूज्यते नृपतिः।।१२, १३, १४।।

यःसर्वः श्रीपर्ण्या इति। यःपर्यङ्कः सर्वो निःशेषं श्रीपण्यां निर्मितो रचितः स धनदाता वित्तप्रदो भवति। यः सर्वोऽसनकृतः स रोगहरो रोगान् हरति विनाशयति। यः सर्वस्तिन्दुकसारेण रचितः स वित्तकरो धनकरः।

यः केवल इति। यः पर्यङ्कःकेवलः शिंशपयैव निर्मित्तः स बहुविधं बहुप्रकारं वृद्धिकरः। यः सर्वश्चन्दनमयश्चन्दविरचितः पर्यङ्कः स रिपुध्नस्तथा धर्म यशः कीर्तिं दीर्घं च जीविंत करोति।

यः पद्मकपर्यङ्क इति। यः सर्वः पद्मकरचितः, पर्यङ्कः आयुर्जीवितं दीर्घं चिरकालस्थायि। श्रियं लक्ष्मीम्, श्रुतं विद्याशुभं धर्म्यम्, वित्तं धनं कुरुते। तथा शालेन कृतो रचितः, शाकरचितश्च कल्याणं श्रेयः कुरुते।

केवलचन्दनरचितमिति। यत्पर्यङ्कं केवलेनैव चन्दनेन विरचितं निर्मितं तथा काञ्चनेन सुवर्णेन गुप्तमाच्छादितम्। विचित्रैर्नानाकारै रत्नैर्मणिभिर्युक्तं तन्नृपो राजा अध्यासन्नुपरि तिष्ठन् विबुधैर्देवैरपि पुज्यतेऽर्च्यते।।

अथ व्यतिमिश्रदारुणां फलमाह-

सर्वः स्पन्दनरचितो न शुभः प्राणान् हिनस्ति चाम्बकृतः।

असनोऽन्यदारुसहितः क्षिप्रं दोषान् करोति बहून्।।१५,१६,१७।

अम्बस्पन्दचन्दनवृक्षाणां स्पन्दनाच्छुभाः पादाः।

फलतरुणा शयनासनामिष्टफलं भवति सर्वेण।।१८।।

गजदन्तः सर्वेषां प्रोक्ततरूणां प्रशस्यते योगे।

कार्योऽलङ्कारविधिर्गजदन्तेन प्रशस्तेन।।१९।।

प्रोक्ततरूणां कथितवृक्षाणां सर्वेषां निः शेषाणां योगे गजदन्तो हस्तिरदः। प्रशस्यते स्तुयते इष्यत इत्यर्थः। प्रशस्तेन लक्षणसंयुक्तेन गजदन्तेन हस्तिरदेनालङ्कारविधिः कार्यः। शोभामुत्पा-दयेत्।।

अथ गजदन्लक्षणमाह-

दन्तस्य मूलपरिधिं द्विरायतं प्रोह्य कल्पेच्छेषम्।

अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित्।।२०।।

गजदन्तस्य मूले यः परिधिः परिमण्डलं द्विरायतं द्विगुणं प्रोह्य त्यक्तवा शेषं कल्पयेच्छिन्द्यात्। एतदुक्तं भवति-मूले यः परिणाहो गजदन्तस्य तद्द्विगुणमायतं गजदन्तमूलात् परित्यज्य शेषं कल्पयेत्। बहूदको देशोऽनूपः। अनूपचराणां गजानां दन्तमूलपरिधिं द्विरायतमधिकमपि प्रोह्य शेषं कल्पयेत्। गिरिचाणिां पर्वतचारिणां न्युनमपि प्रोह्य शेषं कल्पयेन्। यतः पर्वतशिलास्तद्दस्तान् घर्षन्ति।।२०।।

अथ गजदन्तस्य कल्पितस्य शुभाशुभमाह-

स्त्रीरूपे धननाशो भृङ्गारेऽभ्युत्थिते सुतोत्पतिः।

कुम्भेन निधिप्राप्तिर्यात्राविध्नं च दण्डेन।।२१,२२, २३।।

पाशेऽथवा कबन्धे नृपमृत्युर्जनविपत् स्त्रुते रक्ते।

कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति।।२४, २५।।

शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः।

अशुभशुभच्छेदा ये शयनेष्वपि ते तथा फलदाः।।२६।।

शुक्लः शुक्लवर्णः। समस्तुल्यः। सुगन्धिः शोभनगन्धिः। स्निग्धो निर्मल्फ। एवं विधश्छेदः शुभावहो भवति। ये छेदा अशुभाः शुभा दन्ते प्रोक्तास्ते शयनेष्वपि शय्यायां लग्नास्तथा तनैव प्रकारेण फलदाः। तथाविधं फलं भवति। शुभमशुभं वा प्रयच्छतीत्यर्थः। दारूणामप्येवमेव वेदितव्याः।

अथ दारूणां विनियोगमाह-

ईषायोगे दारु प्रदक्षिणाग्रं प्रशस्तमाचार्यैः।

अपसव्यैकदिगग्रे भवति भयं भूतसञ्जनितम्।।२७।।

ईषाशब्देन चत्वारि काष्ठानि घटितान्युच्यन्ते। शिरः पादभागयोर्द्धौ वामदक्षिणभागयोर्द्वावति। तेषां परस्परं यत्र संयोगः शिरः पादकाष्टयोर्द्धे द्वे छिद्रे कृत्वा वामदक्षिणपादकाष्ठानि तेषु क्षिपेत्। तत्रायं क्रमः- ईषायोगे दारु प्रदक्षिणाग्रमाचार्यैः प्रशस्तमुक्तम्। प्रादक्षिण्येनाग्रं यस्मिन्। अपसव्यैकदिगग्र इति। अपसव्येऽप्रदक्षिणस्थे। पूर्वोक्तविन्यस्तस्य शिरः काष्ठस्य यदग्रं तत्र दक्षिणदिक्स्थकाष्ठमूलं क्षिपेत्। तस्याग्रे पादान्तभागस्थं काष्ठमूलं क्षिपेत्। तदग्र उत्तरदिग्भागस्थकाष्ठमूलं क्षिपेत्। तदग्रे शिरः काष्ठमूलं क्षिपेत्। एवं पूर्वदक्षिणपश्चिमोत्तरसंस्थानेन न्यासे कृते प्रदक्षिणाग्र भवति। अपसव्ये न

प्रदक्षिणस्थे पूर्वोक्तन्यासाद्विपर्ययस्थे तथैकदिगग्रस्थिते द्वारौ भूतसञ्जनितं भूतग्रहोत्पन्नं भयं भीतिर्भवति। शिरः पादभागकाष्ठयोरेकस्यां दिश्यग्रं यद्भवति तदैकदिगग्रम्।।

अथ पदानां लक्षणमाह-

एकेनावाक्शिरसा भवति हि पादेन पादवैकल्यम्।

द्वाभ्यां न जीर्यतेऽन्नं त्रिचतुर्भिः क्लेशवधबन्धाः।।२८।।

सुषिरेऽथवा विवर्णे ग्रन्थौ पादस्य शीर्षगे व्याधिः।

पादे कुम्भो यश्च ग्रन्थौ तस्मिन्नुदररोगः।।२९।।

कुम्भादस्ताज्जङ्घाः तत्र कृतो जङ्घयोः करोति भयम्।

तस्याश्चाधारोऽधः क्षयकृद्द्रव्यस्य तत्र कृतः।।३०।।

खुरदेशे यो ग्रन्थिः खुरिणां पीडाकरः स निर्दिष्टः।

ईषाशीर्षण्योश्च त्रिभागसंस्थयो भवेन्न शुभः।।३१।।

निष्कुटमथ कोलाक्षं सूकरनयनं च वत्सनाभं च।

कालकमन्यद्धन्धुकमिति कथितश्छिद्रसंक्षेप ः।।३२।।

निष्कुटं नाम छिद्रम्। अथशब्दश्चार्थे। कोलाक्षम्। सूकरनयनं च। वत्सनाथं च। कालकम्। अन्यदपरं धुन्धुकम्। इत्येवम्प्रकारेण छिद्राणां संक्षेपः समासः कथितः उक्तः।।

अथैतेषां लक्षणमाह-

घटवत् सुषिरं मध्ये सङ्कटमास्ये च निष्कुटं छिद्रम्।

निष्पावमाषमात्रं नीलं छिद्रं च कोलाक्षम्।।३३।।

कालकसंज्ञं कृष्णं धुन्धुकमिति यद्भवेद्विनिर्भिन्नम्।

दारुसवर्णे छिद्रं न तथा पापं समुद्दिष्टम्।।३४, ३५।।

कालकधुन्धुकसंज्ञं कीटैर्विद्धं च न शुभदं छिद्रम्।

सर्वं ग्रन्थिप्रचुरं सर्वत्र न शोभनं दारु।।३६, ३७।।

पञ्चवनस्पतिरचिते पञ्चत्वं याति तत्र यः शेते।

षट्सप्ताष्टतरूणां काष्ठैर्घटिते कुलविनाशः।।३८, ३९।।

यच्छय्यासनमेकद्रुमेणैकवृक्षेण निर्मितं तद्धन्यम्। वृक्षद्वयनिर्मितं धन्यतरम्। त्रिभिवृक्षैः प्रागुक्तै-र्विनिर्मितं तदात्मजानां पुत्राणां वृद्धिकरम्। चतुर्भिर्यन्निर्मितं तदर्थं धनम्। अग्र्यप्रधानं यशः कीर्तिं च करोति।

पञ्चवनस्पतिरचित इति। पञ्चभिर्वनस्पतिभिर्वृक्षै रचिते निर्मिते शयनासने शयने यः शेते स्वपिति स पञ्चत्वं याति। म्रियत इत्यर्थः। षण्णां सप्तानामष्टानां च तरूणां वृक्षाणां काष्ठैर्घटिते निर्मिते कुलविनाशो वंशक्षयो भवति।।